केरळविश्वविद्यालयः

अनन्तशयनसंस्कृतग्रन्थावलिः

ग्रन्थाङ्काः — २०४, २०५, २०६, २०७.

सन्देशचतुष्टयम् ।

१. कामसन्देशः २. हंससन्देशः
३. चकोरसन्देशः ४. मारुतसन्देशः

प्रकाशकः

डाक्टर्. के. राघवन् पिळ्ळ

पौरस्त्यग्रन्थप्रकाशनकार्यालयाध्यक्षः ।

अनन्तशयने एस्. वी. जी. मुद्रणालये मुद्रितम् ।

१९६३/११३८

मूल्यं रूप्यकत्रयम्

INTRODUCTION

After Kālidāsa's Meghasandeśa, the composition of the Sandeśakāvya came by and by to be regarded as one of the essential prerequisites to one's being recognised as a great poet (mahākavi). There followed, therefore, a host of sandeśakāvyas, not all of them of great literary merit. Kerala too was no exception to this general feature of the literary history of medeaval India and a good number of sandeśakāvyas were composed by Kerala authors in both Sanskrit and Malayalam. Perhaps the earliest and most popular sandeśa by an author from Kerala is the Śukasandeśa[1] of Lakṣmīdāsa (13th to 14th century). Among the other sandeśakāvyas of Kerala, the Bhṛṅgasandeśa[2] of Vāsudeva (late 16th century), the Cakorasandeśa[3] of Vāsudeva Bhaṭṭatiri of Payyūr (15th century), the Haṁsasandeśa[4] of Pūrṇasarasvati (14th cent.), the Kokilasandeśa[5] of Uddaṇḍa Śāstri (early 15th cent.)

---

1. *Published for the first time by H. H. Rāmavarma of Travancore. JRAS (1884). An edition along with two commentaries, is forthcoming in the present Series.*
2. *T. S. S. No. 128.*
3. *R 3607 (Madras).*
4. *T. S. S. No. 129.*
5. *Mangalodayam Press, Trichur.*

and the Mayūrasandeśa[6] of Udayarāja (early 16th century) are particularly noteworthy. An incomplete sandeśakāvya in Prākṛt called the Bhṛṅgasandeśa[7] is generally supposed to be the work of an author from Kerala

The four hitherto unpublished Sandeśas which we are publishing as Nos. 204, 205, 206 and 207 of the Trivandrum Sanskrit Series originally appeared in the pages of the Journal of the Kerala University Oriental Manuscripts Library.[8] Of these, three are definitely works of authors who belonged to Kerala while the fourth is only presumably so. All these four works conform to the traditional pattern of sandeśakāvyas. They are all composed in the Mandākrāntā metre and are divided into the Pūrva and Uttara bhāgas as is the case with most of the sandeśas[9]. In all the four poems the Pūrvabhāga describes the route to be followed to get to the house of the heroine while in the Uttara-

---

6. *Poona Oriental Series, 84.*

7. *Edited by Dr. A. N. Upadhye, Karmarkar Commemoration Volume, Poona, 1948. Ms. No. 1471 A.*

8. *Kāmasandeśa - Vol. XI, 1.*
Haṁsasandeśa - Vol. XII, 1 & 2.
Cakorasandeśa - Vol. XI, 2.
Mārutasandeśa - Vol. XI, 3 & 4.

9. *It is interesting to note that one Sandeśakāvya, the Nīlakaṇṭhasandeśa of Punnaśśeri Sreedharan Nambi (No. 1453) is not divided into two parts; it has only one part consisting of 126 verses.*

bhāga the poets describe the city where the house is situated and the pathetic condition of the heroine. This part also contains the signal verse (अभिज्ञावचन) and the message to be delivered to the heroine.

1. Kāmasandeśa:— The Kāmasandeśa of Mātṛdatta consists of 66 verses in the Pūrvabhāga and 69 verses in the Uttarabhāga.[10] The hero while enjoying the company of his wife is suddenly taken away by a rakṣas to Cidambara (भद्रगोष्ठी).[11] He meets Kāmadeva there and requests him to take a message to his wife Candralakṣmī at Tirunāvāya. The route from Cidambara to Tirunāvāya passes through the river Kāveri, the brahmin agrahāra at Kaṇṭhamāṇikya, Madhyārjuna (Tiruviṭaimarutūr), Kumbhakoṇa, Śrīraṅga, Koṅkaṇa[12], the Bhaṭṭinātha temple (the Perūr temple near Coimbatore), Maṅgala, the Tiruvilvāmala temple, Trichur, Iṣṭakroḍa (Tirumittakkode),

10. *Vadakkumkūr, Ullūr and Dr. Kunjunni Raja mention the Pūrvabhāga as consisting of 67 verses. Actually, the manuscript contains only 66 verses in the Pūrvabhāga. The confusion has arisen from a mistake in the numbering of verses in the manuscript. After verse 61, the succeeding verse is numbered 63.*

11. *The manuscript which we have used has the reading* वभ्रगोष्ठी. *A better reading is* भद्रगोष्ठी *as adopted by Ullūr. See KSC, II, p. 348.*

12. *The Salem and Coimbatore districts, according to Ullur S. Paramesvara Iyer.*

Kurukṣetra (Śukapura), Brahmakṣetra, Ambāśaila (Koḍikunnu) and the river Niḷā. The poet mentions two kings, by name Vīra and Acyuta, who ruled the territory to the south and north of the river Kāveri.[13] Mātṛadatta also speaks of a brahmin scholar by name Nīlakaṇṭha[14] and of a poet named Maṅgalam in the village of Maṅgala.[15]

The reference to the Māmāṅkam festival at Tirunāvāya[16] shows that the work cannot be later than 1743 A. D. when the last Māmāṅkam was held. Another clue to the determination of the date of the work is found in the verse where the author mentions a Rāmavarma, king of Cochin, who abolished Yātrāśulka (tolls) in his State.[17] We know of one Ramavarma who ruled Cochin State from 1505 to 1537 A. D. We also know that some arrangements regarding tolls were made between the King of Cochin and the Portuguese " about 80 years after the

---

13. *Pūrva, Vs. 34 and 35.*

14. *Pūrva, V. 64. Ullūr identifies this Nīlakaṇṭha with Taikkāṭṭ Yogiyār. See KSC, II, p. 347 and p. 652.*

15. *Pūrva, V. 52. It is not possible to identify this Maṅgalam at present. It is to be further examined whether he is the same as the author of a ṭīkā on Kirātārjunīya –a manuscript (C.1037 and T.658) available in this Library.*

16. *Uttara, Vs. 8 and 9.*

17. *Pūrva, V.33.*

Portuguese had established in Cochin".[18] If Mātṛdatta is referring to this we will have to assign the work to a date later than the 16th century A. D.

As to the authorship of the poem the Colophons clearly state that it is the work of one Mātṛdatta. The difficulty is to identify this Mātṛdatta since there were in Kerala at least three poets by the name Mātṛdatta. Melputtūr Nārāyaṇa Bhaṭṭatiri's father was named Mātṛdatta; he had as well a brother by name Mātṛdatta.[19] Again, Nārāyaṇan Nambūtiri of Toḻanūr, author of the Tantra works Tantraprāyaścitta and Anuṣṭhānasamuccaya, refers to a Mātṛdatta as his teacher.[20] All these Mātṛdattas lived close to the period during which the Kāmasandeśa might have been written. Therefore it is difficult to determine with any certainty the identity of the author of the present work. It is also equally possible that the author might be a fourth Mātṛdatta different from the three that we have noted. Anyhow the problem still awaits a solution.

---

18. *Cochin State Manual ; C. Acyuta Menon ; Ernakulam, 1911 p. 52.*

19. *Sri. Venkatasubramonia Iyer identifies the author of the present work with the father of Nārāyaṇa Bhaṭṭatiri. See "Mātṛdatta", Summary of papers submitted to the All India Oriental Conference, Lucknow session.*

20. *See E. V. Raman Nambutiri, Introduction to Tantrasamuccaya, Part III, p. 115.*

2. Haṁsasandeśa:— Haṁsasandeśa is a fairly long sandeśakāvya written in imitation of the Śukasandeśa of Lakṣmīdāsa. It consists of 83 verses in the Pūrvabhāga and 88 verses in the Uttarabhāga. The happy couple were enjoying each other's company when the hero is suddenly taken away by a rākṣasī to Laṅkodyāna where, on the word of Vibhīṣaṇa, she releases him. From there the hero sends a message to his wife through a Haṁsa whom he happens to meet there. The Haṁsa is asked to go to a house called Mākanda near Kumbhamālūr (Kuṭamālūr) on the banks of the river Gauṇā (the Mīnachil river). On the way are noted places like Rāmeśvara, the Maṇalūr kingdom, Kanyākumāri, the Vakra mountains (Marutvāmala), Śucīndra, Trivandrum, Kolambanagarī (Quilon) and Nabhonimnagā (Ambalapuzha). Just when about to cross into Kerala the poet gives a fine description of Kerala :

पश्चादस्य क्षितिधरपतेः पुष्कलः केरलाख्यो
नीवृद् ग्रीष्मेऽप्युदकमनिशं मुच्यते वारिवाहैः ।
यत्रोत्तुङ्गाः परिणतफलस्तोमनम्रोत्तमाङ्गा
वर्त्तन्ते ये मरिचवलिता नालिकेराश्च पूगाः ॥

(Pūrva, 45)

The poem remains anonymous at present. The Colophons at the end of the Pūrva and Uttarabhāgas do not give us any indication as to the author of the work. From the very detailed description of Kuṭamālūr we may

guess that the author might have belonged to Kuṭamālūr or to its suburbs.

While the author leaves us entirely in the dark as to his identity we are in a slightly better position in the determination of the date of the poem. The author while describing the Śucīndra temple refers to the Kaimukku ordeal that was prevalent there at that time[21].

नित्यं भूतप्रभृतिभिरमा पार्वतीप्राणनाथो
यस्मिन्नास्ते निखिलविबुधैः सन्ततं सेव्यमानः ।
तप्ते स्नेहे स्फुटमिव जनैर्लोचनागोचराणा-
मालोक्यन्ते प्रियसख फलान्यात्मकर्मोत्कराणाम् ॥

(Pūrva, 52)

The Kaimukku ordeal at Śucīndra was stopped in the year 1845[22]. This indicates therefore that the poem cannot be later than that.

3. Cakorasandeśa — This is a comparatively recent sandeśakāvya. It consists of 50 verses in the Pūrvabhāga and 46 verses in the Uttarabhāga. This sandeśakāvya is unique in so far as here the hero is not separated from his sweetheart by any hard stroke of fate;

21. *For details see Sucindram Temple by Dr. K. K. Pillai.*

22. *Dr. K. K. Pillai, op. cit. Ullur S. Parameswara Iyer says that the poem must have been written after the ascension of Svāthi Tirunāl Mahārāja to the throne in 1829 A. D. But he does not adduce any evidence in support of this. See KSC, IV, p. 116.*

he wilfully goes away from her, heartbroken at his wife's open hostility towards him, and comes to stay at Alwaye on the banks of the Cūrṇī river. From there he sends the message to his beloved at Trichur. On the way are noted Guhapura, Pancaśīrṣa, Saṅgama temple (Irinjalakuda) Valayanilaya (the Ūraka temple), and Puruvana (the Perumana temple).

We get no clue from the work as to the authorship of the poem. In a verse found at the end of the work it is mentioned that a brahmin named Nīlakaṇṭha '*wrote*' the work. This apparently seems to have been composed by some scribe who copied the work though it is not altogether impossible that the author himself might have composed the verse. The verse neither gives us any indication as to the date of the work since the year is not given in the verse[23]. But from the description of certain places in the poem we may presume that the poem was composed not earlier than the 19th century A. D. For instance the poet mentions the Vadakkechira at Trichur where he says the heroine may come in the evening to wash herself[24]. The Vadakkechira in its present form was constructed only round about

---

23. मासे वृषे पुष्यगते शशाङ्के, खे मध्यगेऽहस्कृति चान्द्रिवारे ।
समालिखन्नीलगलाख्यविप्रश्चकोरसन्देशमिदं मनोज्ञम् ॥

खे मध्यगेऽहस्कृति *could mean only 'when it was noon'; tke kali day or kali year, if calculated from this, gives dates obviously improbable.*

24. *Uttara, Vs. 7 and 8.*

1852 A. D[25]. This would indicate that the poem is not much more than a hundred years old.

4. Mārutasandeśa:— The Mārutasandeśa is a long poem consisting of 68 verses in the Pūrvabhāga and and 130 verses in the Uttarabhāga. The message is sent from a mountain named Kanakakaṭaka to the heroine who stays at the city of Kāmadatta, capital of the Saudatta kings. These two places as well as the other places mentioned in the poem seem to be imaginary. So much so, we are left completely in the dark as regards the author and the date of the composition of the poem. We are not even in a position to determine whether the author belonged to Kerala or not. But from the mention of coconut, betel- creeper and arecanut contained in the poem[26] we may infer that the author was at least familiar with Kerala, if not a native himself.

We have no way at present to determine the date of the work[27].

The following are the manuscripts used in the preparation of the editions of these Sandeśakāvyas.

1. Kāmasandeśa:— No. 10974 B. This manuscript originally belonged to the Valiya Rāja of Edap-

---

25. *C. Acyuta Menon, op. cit, p. 176. fn. 1.*

26. *Uttara, Vs. 23 to 26.*

27. *Vadakkumkur Rajarajavarma Raja holds the view that the poem might be contemporaneous with Bhṛṅgasandeśa (late 16th century), though he has suggested no reason for this supposition. See KSSC, III, p. 253.*

palli. The manuscript is old and worm-eaten at many places. Only a few words of verses 35 to 48 are found, the leaves being full of holes left by worms. We have also in this Library a Transcript copy (T. 1226) of the above manusbript.

2. Haṁsasandeśa:— No. 11084 B which belonged originally to Narayanan Mitran Nambutiri, Chempakasseri Kalam, Kutamalūr, Kottayam. The manuscript is complete and intact. We have also a Transcript copy (T. 1205) of the above manuscript.

3. Cakoraśandeśa:— No. L 904 B, belonging to Kotiri Mana, Tirur. No. L. 1236 C, belonging to Narayanan Nilakanthan Nambutiri, Thangur Mana, Peringottukara, Trichur District. Both the manuscripts are complete and in good condition. We have also a Transcript copy (No. T. 1302) incorporating the variants found in the above manuscripts.

4. Mārutasandeśa:— A Transcript copy (No. 119) of a manuscript in the possession of Ettumanur Kailasapurath Pisharody.

I have been assisted in the publication of these works by Sri. A. Ramachandra Sastri, Research Officer, and Sri. M. Madhavan Unni and Sri. C. P. M. Namboodiri, Assistant Research Officers.

Trivandrum
17 - 6 - '63

K. Raghavan Pillai
Curator

॥ श्री ॥

श्रीमातृदत्तविरचितः

कामसन्देशः ।

[पूर्वभागः ।]

सौधे कश्चित् सह दयितया स्वैरमभ्रङ्कषाग्रे
क्रीडन् निद्राकलुषहृदयस्तत्क्षणं तत्सकाशात् ।
(दिष्टे)रुष्टे किमिह शरणं दभ्रगोष्ठीं दविष्ठां
रक्षोनीतस्तदनु विवशः शम्बरारिं ददर्श ॥ १ ॥

दृष्ट्वा हृष्टः स खलु करुणः कामिनीविप्रयोगा-
दुद्भूतार्तिर्द्विषमपि जवात् तं पुनः सन्दिदेश ।
आत्मन्येतत् प्रथममतनुः सोऽपि सन्देशवाक्यं
श्रुत्वा चिन्ताशमितकलहः कामकारीव तस्थौ ॥ २ ॥

कारुण्याब्धे! मदन! भगवन्नस्तु तुभ्यं प्रणामो
यत्सामर्थ्याद् वहति गिरिशोऽप्यर्धगात्रेण तन्वीम् ।
यल्लीलोत्थां नयनपटलीमात्मसौभाग्यहन्त्री-
मद्यापीन्द्रस्त्यजति न भियेवाङ्गभङ्गीरतोऽपि ॥ ३ ॥

चित्रं पश्याम्यविहतगतिं (हेवाऽवेग)वन्तं भवन्तं
मन्येऽनङ्गस्त्वमिति न वि(दो) वास्तवीकं वदन्ति ।
एवंभूतं मनसिज! रुषा तावकं गात्ररत्नं
कोपोद्भूतैर्नयनदहनैः किं दहेदिन्दुमौलिः ॥ ४ ॥

श्रान्तस्त्वं चेदिह वस सुखं हेममय्यां सभायां
पूर्वं कार्या श्रमपरिहृतिः कार्यचिन्ता तु पश्चात् ।
पूजाकर्मण्ययि! तव नृणां पाणि(मुद्रा)पि तुष्टयै
किं वा ब्रूमः सुमहति सुवर्णासिने साधुदत्ते ॥ ५ ॥

मौर्वीघोषं शमय परुषं वर्ततेऽत्र त्रिणेत्रः
कोपाग्रस्तु प्रदहति जनं सर्वमक्ष्णा विरुद्धम् ।
दग्धश्चेत् त्वं हितकृदत एवाङ्ग! दग्धोऽसि नूनं
स्वात्मा बन्धुर्द्वयमिति मतिर्देहिनां भ्रान्तिरेव ॥ ६ ॥

सार्धं प्रेम्णा प्रियसहचरी किं रतिः स्वैरमास्ते
यन्मङ्गल्याद् गिरिशनयने नाग्निदग्धोऽप्यनङ्क्षीः ।
शम्भोर्गौरी रतिमयवपुर्या सती चार्धनारी-
भावं कृत्वा परिहृतवती भर्तृदाहावमानम् ॥ ७ ॥

एनं कान्ताविरहविधुरं विद्धि मामङ्गजन्मन्!
नेता पारं विरहजलधेस्त्वं हि कामातुराणाम् ।
आर्तत्रा(णे) महति सुकृते हस्तलब्धे किलार्थे
मा भूल्लुब्धाध्वगविषमिते (वेतने ते) प्रसा(दः) ॥ ८ ॥

नाहं जाने मम च सुहृदश्चान्तराले कियन्ति
क्ष्माभृत्कुल्याविपिनतटिनीपत्तनानां कुलानि ।
यद्यप्येवं मनसिज! बलादद्य दृष्टो हि(दृ?दि)ष्टया
दैवोत्थाया भवति विपदां दैवतः शान्तिऋज्वी ।। ९ ।।

आपन्मुक्त्यै चल इति मया नार्थितो मातरिश्वा
पूर्णोऽपीन्दुर्मनसिज! जळात्मेति नापेक्षित(ति:?र्थः) ।
मासः श्रीमान् मधुरतिथिरित्यास्थया नेक्षितो वा
त्वं तु प्रौढद्युतिरपरथाभूत इत्युत्सुकोऽस्मि ।। १० ।।

आशालम्बो विरहिसुदशां सा च सन्देशसाध्या
दूतानेयः स च स जववान् त्वत्परः को नु तद्वान् ।
तस्मादस्मद्विषयकथया तूर्णमासाद्य कान्ता-
मायास्यामि द्रुततरमितो यावदाश्वासयेथाः ।। ११ ।।

नीरन्ध्रे पथ्यणुरसि, विभुर्विस्तृते वा, गुरुस्त्वं
वाताक्रान्ते, लघुरसि पुनर्लङ्घने पर्वतानाम् ।
रुन्धे कस्त्वां मदन! वशिनं चेशिनं प्राप्तिमन्तं
प्राकाश्यं स्व प्रकटयसि चेद् गन्तुमर्हस्यतस्त्वम् ।। १२ ।।

याच्ञा कार्या मनसिज! जने मङ्क्षु दीनैरदीने
स्नेहावेशोऽप्ययि बत! परैराशु तद्वत् परस्मिन् ।
नो चेदाद्या हितकृति जळोऽस्मीति वार्ता (मयि स्याद्)
नान्यो वा चेत् पदजुषि शठोऽसीति हेया नि(युग्म?योज्ये) ।।

प्रेष्यत्वं हि प्रथितयशसां निन्द्यमित्यङ्ग! शङ्का
मा मा भूयात् तव हृदि विभो! किं नु पूर्णैरकार्या।
विष्णुः साक्षात् स हि यदुपतिः प्रार्थितं पाण्डुसूनो-
श्चक्रे दौत्यं धुरमिति कथा किं न ते सुप्रसिद्धा॥ १४॥

इन्द्रस्यार्थे स्वतनुमजहा इत्युदग्रं यशस्ते
यद्रक्षार्थं वरमतनुरित्यामृतं नामधेयम्।
सन्त्यज्यैतन्मदन! कृपया तिष्ठसे मह्यमारात्
तस्मादस्मि त्रिभुवनजुषामग्रणीर्भाग्यभाजाम्॥ १५॥

सन्देशाख्यं मधु नवमितो (नीयता)मङ्गनायै
श्लिष्यद्वर्णावलिमयमहाभाजने सङ्गृहीतम्।
मन्दाक्रान्तात्मकपरिलसद्वृत्तचित्रातिचित्रे
शब्दार्थालङ्कृतिपरिमलावाससम्मोहनीयम्॥ १६॥

गन्तव्यं तद् भुवनविदितं मन्दिरं सुन्दराङ्ग्याः
शृङ्गाराब्धे! मदन! भवता चन्द्रलक्ष्म्याः प्रियायाः।
यस्मिन् नित्यं निवसति भवानर्चितः पक्ष्मलाक्ष्या
दत्तानुग्रैः शमयितुमनङ्गाशुगैराशु पुंसः॥ १७॥

गन्तुं कान्ताभवनमयि! ते पश्य भद्रं निमित्तं
शङ्खः शम्भोर्ध्वनति भवने कर्णमानन्दयिष्यन्।
भेरीनादः प्रसरति यथा शोभनः सर्वमास्तां
क्रीडानृत्ते भवति शुभदं शिञ्जितं शैलजायाः॥ १८॥

नावाक्षेत्रं महितमवधीकृत्य देशादमुष्मात्
प्रौढं मार्गं शृणु कथयतो मे मुखादङ्गजन्मन्! ।
दिव्येनाक्ष्णा यदपि विदितं वक्ष्यमाणं तथापि
ब्रूमः सर्वं प्रियजनकथालेशसम्बद्धहृद्यम् ॥ १९ ॥

शुद्धः शम्भुं मदन! शिवगङ्गापयोबिन्दुपूरै-
र्वीतानीतैरपि च जनहस्तो(स्थि?क्षि)तैर्भस्मजालैः ।
आमुक्ताङ्गः शिव मृड भवेत्युच्चरन् नाम शैवं
दभ्रक्षेत्रे विहितवसतिं पूर्वमीक्षस्व साक्षात् ॥ २० ॥

यस्मिन् नृत्यत्यतिजवपतत्पादपद्माभिघात-
भ्राम्यत्क्षोणीविचलनवशात् सन्ततोद्भ्रान्तगात्राः ।
शीघ्रभ्रान्त्या गलितवसनाश्चूर्णजालाङ्किताङ्गाः
साम्यं सर्वे मनसिज! जनास्तत्र गात्रे लभन्ते ॥ २१ ॥

शम्भोः स्थानात् प्रमुदितजनादुत्तरेणाङ्ग! गत्वा
द्रष्टव्या सा मदन! शिवगङ्गाभिधा पुण्यवापी ।
भर्तुर्मूर्ध्नि स्थितिपरिभवक्रुद्धगौरीविरुद्धा
गङ्गा पादाम्बुजमुपगता यन्मिषेणोद्बभूव ॥ २२ ॥

यस्यास्तीरे शिखरिदुहितुर्निर्मितं वेश्म रत्नै-
र्यस्मिन् नानामणिकरमिषाद् वर्तते लोकमाता ।
अन्ते गौर्याः सततवसनात् प्रीतिभाजः सकाशा-
दर्धाङ्गाप्तेः कमितुरुपदेशं रहस्याप्तुकामा ॥ २३ ॥

एनां गङ्गां कपटरसिके पृष्ठतां हन्त! कृत्वा
स्वीये कान्ते प्रतिदिनमवाचीमुखे वर्तमाने ।
एनामेव स्थिरतरमतिं नेत्रयुग्मेन भूयः
पश्यन्तीव प्रतिवसति या सन्निधौ शङ्कमाना ॥ २४ ॥

क्षेत्रे यत्र स्फटिकघटिते क्वापि तत्कान्तिशुभ्रां
दृष्ट्वा गौरीं स च पशुपतिर्जातु गङ्गोपलब्ध्या ।
कन्दर्पार्तें कुरु मयि कृपां जाह्नवीत्यर्धवाक्ये
लज्जामूकः किमु न कुरुते हन्त! देव्यां हसन्त्याम् ॥ २५ ॥

चित्रं यत्र क्षणपरिचिताः संभवेयुः पुमांसः
केशे गङ्गाजलविधिशिरश्चन्द्ररेखाकलापाः ।
कण्ठे काला वपुषि भसितालङ्क्रियालोभनायाः
फाले शुम्भज्ज्वलन(वस?नय)ना वक्षसि व्यालहाराः ॥२६॥

यत्र प्राप्ताः खलु वलिमहे कामिनीकान्तसङ्घा-
स्त्वत्सान्निध्यप्रतिनवभुवं कामपीडाविकारम् ।
दृष्ट्वान्योन्यं मदन! मनसा शङ्कितान्योन्यरागाः
प्रत्याहन्युर्मुहुरपि दृशामञ्चलैः कोपरक्तैः ॥ २७ ॥

अस्मात् क्षेत्राद् वरुणककुभं तूर्णमुद्दिश्य यायाः
सूर्ये प्राच्यां गिरिमुपगते स्वानुकूलैः करौघैः ।
सत्साहाय्यः प्रतिनवसरोजावलीबाणपाणि-
र्मार्गे मार्गे मदन! मधुपव्यूहमौर्वीकरः सन् ॥ २८ ॥

तस्मान्मार्गादगलितगतिः साधु सारस्वतार्थं
तत् कामाक्ष्याः शशिदिशि गतं क्षेत्रमीक्षस्व दूरे ।
धातुर्वक्त्रे सति हरहृते या किलोत्पत्य तस्माद्
यद्रन्ध्रान्तर्निपतति निजापत्तिशङ्काकुलेव ॥ २९ ॥

भूयो रक्षःककुभि परिवृत्याशु तुङ्गस्रवन्तीं
कावेरीं तां भुवनविदितां पश्य पुण्यैकवश्याम् ।
चोळक्षोणेरुरसि घटिता या खलु स्रङ्मतल्ली-
वाभात्युच्चैर्विविधविबुधक्षेत्रमाणिक्यगुम्फा ॥ ३० ॥

लीलाचञ्चन्मकरनयना या पयश्शीघ्रगत्या
नृत्यत्पङ्केरुहकुचभरा लोलकुल्याकरान्ता ।
मन्दभ्रश्यत्सलिलवसना गामिनी भर्तृदेशं
प्रत्यक्षोद्यत्पुलिनजघना कामिनीवावभाति ॥ ३१ ॥

सह्याद्रेः प्रथममुदिता कौटकीं भूमतल्लीं
गत्वा भूयः सुजनललितं चोळमासाद्य हृद्यम् ।
श्रीरङ्गाख्यं सरसिजदृशो विष्वगावेष्ट्य वस्त्यं
या च प्राप्ता लवणजलधिं प्राच्यमुत्पूय लोकान् ॥ ३२ ॥

यात्राशुल्कं सकलजगतामस्ति यत्र प्रभूतं
तत्रस्थैस्तैर्नृपतिपशुभिर्भुज्यमानं बलेन ।
मातृक्षोणीवलभिदखिलत्राणनैपुण्यचुञ्चु-
र्दुर्वारं यत् प्रशमितकथं निर्ममे रामवर्मा ॥ ३३ ॥

यद्भागार्धे वसति नृपतिर्दक्षिणे वीरनामा
यस्मिन् हेमान्यनिशमखिलान्यात्मसात्कर्तुकामे ।
मेरुः स्वीयक्षयभयमतिर्मृच्छिलामात्रगात्रे
गोत्रव्यूहे हसति सकले जायते दुःखदुःखी ॥ ३४ ॥

अन्यः कश्चित् प्रभवति महत्युत्तरार्धे यदीये
यो वा नाम्ना भवति न गुणैरच्युतः क्षोणिपालः ।
यं वा दृष्ट्वा कुसृतिनिपुणं द्रौणिदुर्योधनाद्याः
स्वीयापायव्यसनममितं दुस्त्यजं संत्यजन्ति ॥ ३५ ॥

राज्ये वेदाः सदसि(व...ता? वसतां) भूसुराणां यदीये
तारप्रोक्तैर्दधति लघुतां कालतः क्लेशतो वा ।
(या)सा सन्ध्या नियमविहिता गौरवं वेदवाचां
निःशेषाणां वहति भगवन्! य(त्व)तस्त्वर्थतो वा ॥ ३६ ॥

याम्यां मार्गात् ककुभि महितः कण्ठमाणिक्यनामा
विद्वद्ग्रामो भवति कुतुकोत्पादकः पण्डितानाम् ।
बालोऽप्युच्चैः प्रतिभुवि शुको यत्र तर्कोद्धतानां
तार्कीं वाचं शमयति मुहुः किं पुनः प्रौढवाचः ॥ ३७ ॥

अग्रे मध्यार्जुनमिति परं क्षेत्रमस्तीन्दुमौले-
र्यत्रान्तस्था(र्जुनतरुतटे दि्व्य)माभाति लिङ्गम् ।
अत्यौत्सुक्यान्मनसिज! हरेर्गोपवेषस्य लीलां
यत्तन्नित्यं समनुकुरुते पादपद्वन्द्वमध्ये ॥ ३८ ॥

क्षेत्रं क्षेत्राद् व्रज पशुपतेः कुम्भकोणाभिधेयं
शम्भोर्नृत्तश्रमशमविधौ स्वैरवासाय सृष्टम् ।
पापव्यूहं खलु जनिमतां जातु यत्रागतानां
लेख्ये नित्यं वसति लिखितं चित्रगुप्तः प्रमार्ष्टुम् ॥ ३९ ॥

यत्पर्यन्ते भवति विपुलः कोऽपि पद्माकरोद्धो
माघे यस्मिन् कुशलजननी जाह्नवी सन्निधत्ते ।
अन्तर्गन्तुं निजमवसरं भर्तुरन्वीक्षमाणा
रोषावेशादिव जलरवैरागतिं बोधयन्ती ॥ ४० ॥

श्रीरङ्गाख्यं व्रज शिशयिषुः स्वैरमागत्य सिन्धोः
शेते यस्मिन् हरिरसहनस्तोयवातान् सुशीतान् ।
विष्वग् वापीशिशिरपवनैः क्लेशितः सोऽपि भूयः
को वा वैधीं त्यजति सुतरां कल्पनां पौरुषेण ॥ ४१ ॥

निन्द्यं स्थातुं श्वशुरभवनं काम ! जामातुरित्थं
स्मृत्वा लक्ष्मीपरिणयविधेरूर्ध्वमिन्द्रानुजन्मा ।
यत्रागच्छद् विपुलतटिनीच्छद्मगात्रेण पुत्री-
स्नेहाधिक्यात् सलिलनिधिना नित्यमत्यक्तपार्श्वम् ॥ ४२ ॥

एकेनाह्ना व्रज पुनरितः कोङ्कणान् कण्टकाख्यान्
धात्रा सृष्टान् नरकधरणीसृष्टिशिष्टैः पदार्थैः ।
यज्जातानां दुरितगणनाशक्तितश्चित्रगुप्तः
स्वीये कृत्ये भवति विमुखः किं नु भूयो वदामः ॥ ४३ ॥

मार्गद्वित्वं भवति च ततस्तत्र वक्रोऽपि वामः
स्वीकर्तव्यस्तव पशुपतिर्यद्गतो भट्टिनाथः ।
यस्य स्फीतं फलमिह सकृद्दर्शनस्यान्ध्यहानिः
पश्चान्मुक्तिः स खलु गिरिशः कस्य नो दर्शनीयः ॥ ४४ ॥

लङ्घ्यः सह्यस्तदनु भवता यत्र धात्रीतरुण्याः
केशीभूते मृगततिमयी यूकपङ्क्तिर्निलीना ।
भूभृत्कान्तैः शरनखमुखैश्चालयित्वा सलीलं
शूत्कारोक्तिप्रसरमुखरैरन्वहं भज्यते हि ॥ ४५ ॥

स्वैरं गन्तुं नहि भृगुपतिः केवलं केरलान् स्वान्
रुद्धाकाशं पथि परशुना यं बभञ्जाद्रिराजम् ।
औन्नत्येन स्मर! परमधःकुर्वतस्तस्य सर्वं
गर्वोच्छित्त्या अपि परमदोद्रेकलेशासहिष्णुः ॥ ४६ ॥

तद्रन्ध्रेण द्रुतमविरलान् केरलान् गच्छ चोलाद्
नानावापीचरणपयसा त्यक्तमार्गश्रमार्तिः ।
व्याधव्याजाद् विचरणरुचेः शूलिनः पार्थबुद्ध्या
त्वय्यासज्यद्धनुषि विपिने तत्र मा भूद् विरोधः ॥ ४७ ।

तेषु श्रीमाननुपमगुणो दक्षिणो ना(य)को ना-
मोर्वीनाथो भवति भवता तत्क्षितिः पूर्वगम्या ।
यस्यास्तावन्मदन! सुतनोर्दक्षिणोदीच्यहार्यौ
तुङ्गौ कौचित् पृथुतरकुचद्वन्द्वशोभां विधत्तः ॥ ४८ ॥

तस्या भूमेरधिपतिरसौ सादरं सेवनीयः
सूत्रं मा मा तव गलगतं तत्क्षणं नन्दयेथाः ।
तज्जातीयाः कुलधनतदालोकनाढ्येषभूमि-
च्छात्राशङ्काजनितकुतुकाः संस्पृशेयुर्भवन्तम् ॥ ४९ ॥

यस्यामुष्यत्रिभुवनभवत्सम्पदाक्षेपशक्ति-
र्लक्ष्मीलीलाचलननिलया कापि हृद्या निषद्या ।
यद्विश्लेषे सति बत परे लौकिकाः केरलीयान्
दृष्ट्वा बालानिव विवसनान् हस्तताडं हसेयुः ॥ ५० ॥

तस्माद् देशाद् द्रुततरमवाचीमुखो याहि यावद्
गङ्गा साक्षाद् विगलति निळा नाम यत्तीररूढे ।
बालाग(त्ये?स्त्ये) निवसति शिवा खण्डितायाः सपत्न्याः
शीघ्रं यान्त्याः शमनविधये (द्रा?ग्रा)प्नुवन्तीव पार्श्वम् ॥५१॥

दृष्ट्वा देवीं पटुगतिरटन् मङ्गलं गच्छ देशं
तद्भूरत्नं द्विजमपि तथा मङ्गलं मङ्गलाख्यम् ।
वाग्गुम्फस्य स्मर! रचयितुं काङ्क्षितस्योक्तशेषं
निर्मातुं यन्मिषकृतवपुः कालिदासः पुनर्भूः ॥५२॥

तस्माद् गच्छन् यमदिशि विभो! पश्य विल्वाचलेन्द्रं
विष्णुः साक्षाद् वसति सहितो यत्र पद्मोर्वराभ्याम् ।
अन्यागारस्थितिविमुखयोः कान्तयोराद्रिशृङ्गं
तुल्यं पश्यन्निव सुखमतिः को नु पत्नीद्वयेन ॥ ५३ ॥

पश्चाद् गच्छन् मनसिज! पुनः पुण्यशाली विशालं
दूरात् क्षेत्रं वृषपुरमिति ख्यातमीक्षस्व साक्षात् ।
गङ्गाचूडं मनसिज! पतिं वीक्ष्य कोपेन देव्यां
प्राग्वक्त्रायां स खलु विमुखो वर्तते यत्र शम्भुः ॥५४॥

दृष्ट्वा गौरीं रमणवपुषं रोषवत्यां रमायां
य(स्माद्? स्मिन्) गत्वा गिरिशसविधे विष्णुरास्ते विनीतः ।
तामेवास्मादपरसुलभां वत्सलादिन्दुमौलेः
प्राप्तुं लोभादिव कृतमतिर्देहसंक्रान्तिविद्याम् ॥ ५५ ॥

यस्मिन् क्षेत्रे हरिहरमयी वर्तते कापि मूर्ति-
र्मन्ये यस्याः सति सुरगणे स्मेरवक्त्रे समन्तात् ।
अर्धं नग्ने खलु निजपटाग्रेण तच्छादनेच्छा-
वर्धेऽन्यस्मिन् क्रमविलुलितं यावदेतच्च नग्नम् ॥ ५६ ॥

काचित् सौम्यां दिशि पुनरतो राजधानी समिन्धे
सृष्टा राज्ञा प्रथितयशसा रामवर्माभिधेन ।
रामे स्वर्गं गतवति चिरादाकुला सत्ययोध्या
यद्रूपोत्था शमयति शुचं तेन वैधव्यजाताम् ॥ ५७॥

क्षेत्रोपान्ते निशमय मठाः सन्ति सन्न्यासभाजां
शास्त्रादर्शे मनसिज! सुसन्दष्टशारीरकाणाम् ।
पश्चात् सर्वं क्रमगतिपदेष्वर्चिरादिस्थलेषु
प्राश्यारब्धं पुनरनुपमं मुक्तिसौख्यं गतानाम् ॥५८॥

आहृत्याक्षिभ्रमणममुतः शाकरात् क्षेत्ररत्नात्
सद्यो यायाः प्रियसहचरीदेशमव्याजवेगः
स्वच्छन्दात्मा चपलवचसां याहि याहीति वाचा
क्रुध्यत्येव क्लिशितहृदयस्त्वामृते पुण्यशीलम् ॥ ५९ ॥

इष्टक्रोडस्तदनु भवता गम्यतामात्तवेगं
यद्भूदेवेष्वर्जनि महितेष्वाभिजात्योर्ध्वसीमा ।
येषां पूर्वं क्रतुभिरयुतं वत्सरानिष्टवन्त-
स्त्रेतावह्नीनथ ददुरमी तेषु जात्युन्नतत्वम् ॥ ६० ॥

याहि ग्रामं द्रुतमथ कुरुक्षेत्रमस्मात् प्रदेशाद्
यद्विप्राणां विहितनियमाचारजातैस्तपोभिः ।
ब्रह्मक्षत्रेत्यमितयशसस्तावदद्यापि नेयं
क्षत्राक्रान्त्या लघुरपि मही मुच्यते केरलाख्या ॥ ६१ ॥

येषां शास्त्रे प्रकृतिकठिनो वर्तते वाग्विवर्त-
स्तर्कारम्भे प्रकृतिपरुषो जृम्भते वाक्यगुम्फः ।
काव्यास्वादे प्रकृतिमधुरः स्यन्दते वाङ्मरन्द-
स्ते वा केषां नहि नुतिपदं विश्वविद्याविदग्धाः ६२ ॥

अम्बाशैलस्तदनु भवता गम्यतामङ्गयोने!
गत्वा दृश्यं दृषदि गिरिजापादविन्यासचिह्नम् ।
एकेनैव स्मर! गिरिसुता यत्र पादेन तस्थौ
भङ्ग्या कर्तुं प्रियमिव कदाप्येकपादस्य शम्भोः ॥ ६३ ॥

यस्योदीच्यां दिशि निवसति क्ष्मासुरो नीलकण्ठो
लोके कालक्षपितयजने धर्मतत्त्वे प्रलीने ।
स्मृत्वा साक्षात् स्वविधिनियमध्वंसविध्वस्तधैर्यो
धर्मास्थित्यै पुनरजनि बौधायनो यत्स्वरूपः ॥ ६४ ॥

पश्चाद् गच्छन् प्रविश सदनं श्रीगदाशूलपाण्यो-
र्बिम्बं यत्र त्रयमपि तयोरेकमेकं च मिश्रम् ।
स्वत्वे मानाद्यादिह सदृशे शाकरेऽपि प्रविष्टं
दिग्भ्रान्त्येव प्रतिमुखमभूद् वक्रता केन सन्ध्या ॥ ६५ ॥

तीर्त्वा वत्सां तदनु निवसन्नम्लशैले निलाख्यां
दृष्ट्वा पश्चादखिलदुरितध्वंसधुर्यावलोकाम् ।
नावाक्षेत्रं प्रविश भुवनेष्वपरक्षेत्रनाम्ना
विश्वश्लाघ्यं मदन ! जुषतां मंक्षु दत्तापवर्गम् ॥ ६६ ॥

इति मातृदत्तविरचिते कामसन्देशे पूर्वभागः
समाप्तः ।

अथ उत्तरभागः ।

पुण्ये यस्मिन् वसति नवभिर्योगिभिः कल्पितात्मा
विष्वक्सेनो विपदि जगतां दत्तहस्तावलम्बः ।
गौरीभर्तुः किमि(ति) भगवन्नर्धमास्थ (धा?त्व)येति
क्रुद्धेवाङ्काद् वसति कमला यस्य किञ्चिद् विदूरे ॥ १ ॥

कोणे यस्मिन् मदन! शिखिनो मण्डपः कोऽपि तुङ्गः
स्वर्णाकीर्णो विलसति हरेरास्पदं विश्ववन्द्यः ।
कैलासेन त्रिणयनभृता निन्दितः सोऽपि मेरु-
र्यद्व्याजेन प्रणिहितवपुः प्रौढिमाढौकते स्वाम् ॥ २ ॥

ऐशे चाभात्यचलजलधिस्वाामिनो भुक्तिशाला
तद्भङ्ग्याप्तोदयमपि च तं वीक्ष्य कैलासशैलः ।
यद्भक्तौघच्छलकृतवपुर्विश्वतुष्टयै भविष्यन्
मेरूक्त्येव द्विजपरिषदा पीड्यते हन्त मानी ॥ ३ ॥

यस्मिन् दृश्यं प्रतिनवसुधापाण्डरं सालचक्रं
प्रोत्तुङ्गाङ्गं मदन! परितो यन्मिषेणोद्गतस्य ।
चक्रीन्द्रस्य प्रविततफणाकारतः शोभमानं
वक्त्रश्रेणीघटितशिखरं भासुरं गोपुराग्रम् ॥ ४ ॥

यत्पादान्ते स्रवति हि निळा नाम काचित् स्रवन्ती
निःशेषांहःप्रशमनधुरीणाम्बुसम्भावनीया ।
गौरीतल्लात् कमितृनिकटाज्जन्मभूरेव हृद्ये-
तीत्थं स्मृत्वा विबुधतटिनी यन्मिषेणावतीर्णा ॥ ५ ॥

यस्यास्तीरे भवति सदनं दक्षिणे दक्षहन्तु-
र्यज्ञध्वंसादधिककुपितं विष्णुमाराधयिष्यन् ।
रुष्टस्यारादनुमतिमृते स्वामिनः प्रीतिकामै-
र्नायातव्यं द्रुतमिति धियेवाप तोयावधिं यः ॥ ६ ॥

क्षेत्रादस्माद् दिशि बलरिपोर्वर्तते क्षेत्रमन्यद्
यस्मिन् प्रीत्या हरिरुपगतो द्रष्टुमिष्टं गिरीशम् ।
विप्रीभूतत्रिदशनिगमस्तोत्रसम्भाविताह-
म्भावं दृष्ट्वा भवति विमुखो यः पुनस्तं रुषेव ॥ ७ ॥

मध्ये कश्चिद् वटतरुरनङ्गैतयोर्हरिधाम्नो-
र्यस्योपान्ते त्रिभुवनमुदे केरलेन्द्रो द्वितीयः ।
तिष्ठेन्माघोत्सवमनु लसन्मन्दहासच्छलोद्यद्-
गङ्गातोयप्लुतिविहरणानन्दिताशेषजन्तुः ॥ ८ ॥

शैलाभोगो भवति भवनात् पद्मनाभस्य पश्चा-
न्माघे यस्मिन्नचलजलराशीश्वरः संचकास्ति ।
शोभाभङ्गं समयनियतं त्यक्तमौत्सुक्यशाली
यद्भूपात्मा विलसति शशाङ्कादितेजःसमूहः ॥ ९ ॥

देवव्यूहे गतवति महं द्रष्टुमाप्तस्य विष्णोः
स्वर्गः सम्पत्प्रचुरिमानिधिर्दैत्यदुर्वैरभीरुः ।
ऐश्वर्यं स्वं विशदयशसो यस्य शक्त्या रिरक्षु-
र्गेहव्याजात् स्वयमधिगतो रक्षति स्वं शरीरम् ॥ १० ॥

यस्मिन् वाराम्बुधिशिखरिणोरीश्वरं तिष्ठमाने
वेगात् सिन्धौ जनततिमिषादागते द्रष्टुकामे ।
शैलाः कुम्भिच्छलितवपुषस्तूर्णमायान्ति मोदाद्
वाताम्भुप्रचलितलतापाणिभिः सोपचाराः ॥ ११ ॥

वाचा सिन्धोरिव निकटभाजीशितुर्निम्नगायां
मुक्तः कश्चित् कुलशिखरिभिः सप्तभिः सप्तपर्णः ।
बिभ्रत्तेषां निजदलमिषात् सप्तसन्देशपत्रीं
शैलाब्धीशं गिरिमकुटगं सेवते पार्श्ववर्ती ॥ १२ ॥

कान्ते कोपात् सति विघटिते यत्र घोरे निशीथे
कामोन्मादात् स्वयमभिसरन्त्यातुराः कातराक्ष्यः ।
ध्वान्तक्लेशे दशनसुषमासंहृतेऽप्यक्षिकान्त्या
यात्राभङ्गादपि बत! भृशं क्लेशभाजः पदव्याम् ॥ १३ ॥

सौधे यस्मिन्नधिगतिजुषां योषितामास्यबिम्बं
मुग्धं पश्यन्नधिकविमतिर्लज्जया पूर्णचन्द्रः ।
पश्चादद्रेः शिरसि कषणे स्वीयमालिन्यमुक्त्यै
बद्धोत्साहो भवति नियतं क्षीयते यत् क्रमेण ॥ १४ ॥

यत्र स्त्रीणां कुचभरयुगं वीक्ष्य खेदाद् गिरीन्द्रा
मेघे मेघेऽप्युपलकठिने घ्नन्ति मूर्धानमुच्चैः ।
नूनं नो चेत् कथमिव घनध्वानवद् रोदघोषो
वर्षाम्भोवन्नयनसलिलं धातुवद् रक्तधाराः ॥ १५ ॥

यत्र प्रातः क्वचन सहिता हन्त गूढं नवोढा
स्थित्वान्योन्यं रहसि चरि(यी?तं) कौतुकेन ब्रुवन्त्यः ।
श्रुत्वा सर्वं मनसिज! जने शृण्वति द्राग्वदद्भिः
भूयो रुद्धैरपि शुकविटैराशु हास्याः क्रियन्ते ॥ १६ ॥

तस्योपान्ते हिततमफलारम्भसम्भावनीयैः
शीतच्छायाप्रसवसुभगैः शीतलं शाखिवृन्दैः ।
हेमाकारैरपि च वरणैरावृतं मञ्जुलाक्ष्याः
पूर्णाभोगं विविधविभवैः शोभते वेश्मरत्नम् ॥ १७ ॥

रत्नव्रातप्रसृमरकराक्रान्तिनिर्धूतरात्रौ
कम्रापाङ्ग्या मदन! भवने सन्ततं चक्रवाकाः ।
सङ्क्रीडन्ते सह दयितया किं तदाश्चर्यमस्मिन्
पांसुक्रीडां कनकरजसा कुर्वते यत्र बालाः ॥ १८ ॥

यस्मिन् सौधो हर इव सिताङ्गो भुजङ्गाधिरूढ-
स्तुङ्गो मूर्ध्नि स्फुरदमरवापीन्दुविद्योतमानः ।
ज्वालाशुम्भन्मणिगणमयप्रौढफालान्तनेत्रः
कण्ठेकालो मरतकमहारत्नबन्धैः समिन्धे ॥ १९ ॥

यत्राशोकः किसलयदुकूलाञ्चलैरञ्चितात्मा
पुष्पश्रेणीविरचितशिरोऽलङ्क्रियालोभनीयः ।
मूर्ध्ना नम्रः फलभरजुषा पादयोः पक्ष्मलाक्ष्याः
कान्तः कोपादिव शठमतिः पीड्यते मङ्क्षु पद्भ्याम् ॥२०॥

कश्चित् पश्चाद् भवति बकुलो यस्य पार्श्वोपशोभी
सौभाग्यं ते सुतनुहृदयोद्दीपनैर्विभ्रमैर्मे ।
इत्थं गर्वात् पिकरुतमिषात् क्षिप्तया पक्ष्मलाक्ष्या
मानो मुक्तः कृत इव रुषा वक्त्रताम्बूलपिष्टैः ॥ २१ ॥

आम्रः कम्रो भवति मधुरारम्भणे यस्य पार्श्वे
जाताधिक्यः स्मर! परगुणालोकने जातखेदैः ।
स्वीयैरन्यैः सुरवरतरुर्नन्दनाद् भ्रंशितः सन्
यत्तादात्म्यं सपदि लभते पुण्यपूरैरनेकैः ॥ २२ ॥

वल्लीबद्धः स खलु तरुणः शोभते चूतशाखी
कान्ताश्लिष्टः प्रिय इव पुमान् मञ्जरीमन्दहासः ।
भृङ्गापाङ्गः किसलयदुकूलावलीलोभनीयः
पूर्णच्छायः सुरभिलपरागानुलेपोज्ज्वलाङ्गः ॥ २३ ॥

कश्चिद् यस्मिन् मनसिज! महान् हेमपुष्पः समिन्धे
हेमाकारैः कुसुमनिकरैरुज्ज्वलाङ्गो नितान्तम् ।
स्वर्णाहार्यः स्वयमयमसौरभ्यदोषं जिहासु-
र्यस्य स्फीतद्युतिमयवपुर्वर्तते हृद्यगन्धः ॥ २४ ॥

यत्पर्यन्ते भवति सुभगः कोऽपि पद्माकरोद्धो
यस्मिन् कान्ता मदन! दयिता तोयदृष्टास्यबिम्बा ।
चन्द्रभ्रान्त्या निजकरतलेनैनमादातुकामा
दृष्ट्वा गूढं खलु परिजनैस्तत्क्षणं पर्यहासि । २५ ॥

कूपः कोऽपि स्फुरति विमलेनाम्भसा यत्र पूर्णो
लुब्धैर्न्यस्तः स इव विबुधैः स्वीयपीयूषकुम्भः ।
एतत्पातुः परममरतेतीर्ष्ययेवापहर्तुं
यस्योपान्ते वसति हि तुलायन्त्रभङ्ग्या कृतान्तः ॥ २६ ।

द्रक्ष्यः क्रीडागृहपरिसरे क्वापि कश्चित् कलापी
योऽस्याः क्रीडानटनसमये सन्निधायाम्बुजाक्ष्याः ।
तुल्यं नृत्यत्पदमनुपदं न्यस्य मान्द्येऽलसायाः
क्रीडन् भूयो रहसि लभते लिप्सुरीर्ष्याकटाक्षान् ॥ २७॥

यत्र च्छायाशिशिरितलतामण्डलीलोभनीयं
कामोद्यानं भवति कुसुमामोदहृद्यान्तरालम् ।
जातामर्षस्तिमिरनिकरो यन्मिषेणोद्गतः सन्
जेता भास्वत्प्रचुरमहसामन्वहं वैरभाजाम् ॥ २८॥

तत्र प्रायो वसति तरुणीमौलिमाणिक्यमाला
शङ्के सम्प्रत्यीमतविरहम्लायमानाङ्गवल्ली ।
शय्यां पौष्पीमपि निजशरीरोष्मणा शश्वदुष्णां
नेच्छत्यात्मश्रमविहतये किं पुनः क्षौमशय्याम् ॥ २९॥

अन्तर्गत्वा सुचरितनिधे! पश्य दृग्भ्याशुभाभ्यां
नारीरत्नं नरनयनयोर्नव्यपीयूषधाराम् ।
विश्वश्लाघ्य भुवनविजये मोहनास्त्रं त्वदीयं
धातुः साक्षात् परि(चि? ण)तफलं लोभनीयं स्वसृष्टेः ॥३०॥

वर्णस्तस्याः किमिव वपुषो वर्ण्यते वर्ण्यकीर्ते!
दृष्टे यस्मिन् कनकसुषमा नेत्रयोराधिहेतुः ।
सन्ध्यारागः सुचिरमसितभ्रान्तिमाधातुमीष्टे
विद्युत्कान्तिः शिव शिव! मषीमात्रशोभां बिभर्ति ॥ ३१॥

वाङ्माधुर्यं जयति हृदयानन्दि...योषिन्म...
... ... वसङ्गाः ।
दुःखादिन्नः सुचिरममृते शङ्कया वा न वात्र-
न्यस्यच्छिद्रां निजवदनतो नूनमादायपूर्णम् ॥ ३२ ॥

तुष्टया दृष्टिं वितर विमले केशपाशे मृगाक्ष्या
दन्तज्योत्स्नारिपुपरिभवे भीतिरूद् ध्वान्तजालम् ।
यस्मिँल्लीनं पुनरपि निजैर्भ्रूकटाक्षालकाद्यैः
स्वीयं वैरं जनयितुमिव स्वीकृतोत्साहमास्ते ॥ ३३ ॥

गात्रच्छायातरलतटिनीतोयमग्ने मुखाब्जे
मत्स्यद्वन्द्वं कृतविहरणं च ... नेत्राभिधानम् ।
जित्वा लोकान् मनसिज! कृतार्थस्य ते केतुचिह्नं
यद्रूपेण प्रणिहितमितो भावि चेदस्ति जेतुम् ॥ ३४ ॥

फालस्येन्दो ... ... तरुणार्कप्रभाभङ्गभीरो
रक्षां कर्तुं मदन भवता वीर! कारुण्यभाजा ।
... मध्ये स्वधनुरनयोर्भ्रूमिषेण...न...
... ... ज्ञापयित्वा ॥ ३५ ॥

नाभीरन्ध्रान्नयनसुभगादुत्थिताया लताया
रोमावल्या इव फलयुगं भाति वक्षोजयुग्मम् ।
कोकद्वन्द्वं दशनतरुणार्कप्रभानित्ययोगाद्
रा ... द्वर्तते यन्मिषेण ॥ ३६ ॥

श्रोणीचक्रं भुवनविजयाभ्यास ... ...
मन्ये धन्यां तव कृतपरिश्रान्तिरह्वाय यस्याः ।
वीरव्रातं जयसि कुसुमैर्नायसैरद्य बाणै-
र्भृङ्गीमौर्व्याप्यनिश्चलया चक्षुचापेन चित्रम् ॥ ३७ ॥

गा ... या सरिति सुदृशो लङ्घनायोरुयुग्मं
रम्भाभङ्ग्या जघनपुलिनप्रोन्मुखं शोभतेऽस्याः ।
जानुद्वेषादखिलजगतां गामिनी घ्रष्टितन्वी (?)
यस्मिन् ... प्रणयपवनाघातनुन्नाप्यकम्पाः ॥ ३८ ॥

याश्च ... स्पष्टुका ... कलावक्रबिम्बं
.. बहुविधकलापुष्पकं पूर्णचन्द्रम् ।
शब्दांस्तासु प्रसृमरगुण .. युक्ता-
श्शोभन्ते ते नखरमणयः कम्रकान्तिप्रदीपाः ॥ ३९ ॥

इत्थं तैर ... वि ... न्य ... थमानै-
र्जानीहि त्वं मम सहचरीमङ्गभङ्गं ...
... . पुनः पश्यतस्ते
मा मा भूयाद्विरहिणि ... ... ।४०॥

... ... विरहदहनज्योतिषा दह्यमानां
.. .. ।
इष्टे पृष्टे सति स रसनामन्यथा ... ...
... ... द्रूपणाज्जोपभावे ॥४१॥

दैवादे ... ...
... ... तिमपि भवता तत्क्षणं संविधेयः ।
स्व ... ...
निष्प्रत्यूहं सुखमनुभवत्वम्बुजाक्षी ... ॥ ४२ ॥

... ... ष्टं विशेषा-
दित्थं सख्य ... ... ।
... ... शिथिलिते स्वीकृतेऽपि प्रयत्नात्
प्राणालम्ब ... ... ॥ ४३ ॥

हा हा निद्रे क नु खलु गतासीदृशीं मां त्यजन्ती
... ... तासि ।
अन्यासक्ते त्वयि विशरणा हन्त ... ...
... ... निर्गतं वा रुदन्ती ॥ ४४ ॥

उन्मुक्ता सा मुदितविम ....
... मत्वा स्थितमिह सखे गच्छ सख्याः समीपम् ।
... ...
पादक्षेपं बत विधिवशादम्ब ... ... ॥ ४५ ॥

... ... शयनात्तूर्णमुत्थाय यान्ती
भो भो य .. ... क्व ... ।
... ानं सुचिरमलसा हन्त जाता सखीभि-
र्दत्तालम्बा ... ... ॥ ४६ ॥

... न्धूर्नः क्वचन तरुणो यात इत्युक्तिभाजां
पुंसां ... ... नां ... ।
पश्यन्त्या मे हृदयविपदं को ... ति ...
... ... भूयशः कुर्वती वा ॥४७॥

... ... श्वलति सहसा प्रेरितो वा स्वयं वा
... ... न्याः ।
पश्यन्ती सा वदनमथ या शान्तखेदं शयाना
.... ॥४८॥

... ... शया प्रेरिताया ....
द्रष्टुं सद्यः प्रतिनवदशा कान्तमेकान्तबन्धुम् ।
आपृच्छन्त्या मम सखि! पुनर्दर्शनं जातु भूया-
दित्यालापैरधिकमथवा शारिकां शोचयन्ती ॥४९॥

काले तस्मिन्नरतिजननात्त्यक्तशीतोपचारां
निःश्वासानामविरलतया मुक्तशोभाधरोष्ठीम् ।
वक्तुं वेगान्मदन! भगवन्मा(र)मस्वायताक्षीं
विश्लेषान्न त्यजति हि जनः प्राणभारं जवेन ॥५०॥

भो भो सख्यः! कथयत कथां प्राणनाथस्य येन
क्षीणे (गात्रेऽ)प्यथि पुनरियात् तूर्णमाश्वासमात्मा।
वैफल्यं चेद्वदत चरित शैवमाब्जेक्षणं वा
प्रेयुः प्राणा इति निजसखी सादरं याचमाना ॥५१॥

यस्यां यस्यां दिशि मम दृशा सङ्गतं तत्र तत्र
स्मेरं वक्त्रं प्रणयमधुरं दृश्यते लोचनं च।
कान्तस्याराददिति (यत?वत!) नभो वीक्ष्य सम्भ्रान्तचक्षुः
स्निग्धे वर्गे (तददति?) परितो वर्तमाने वदन्तीम्॥ ५२॥

सोऽयं कान्तः क्षणमपि कदा हन्त दृश्येत साक्षा-
दित्थं चिन्ताशतचलधियो मञ्जुवाणीमतल्लयाः।
ऊरुर्वामश्चलनसुभगः शान्तयिष्यत्युदग्रं
तापं भद्रं भवति शकुनं भाविनि श्रेयसि प्राक्॥ ५३॥

इत्थं दृष्टे शुभदशकुने जातवक्त्रप्रसादा-
मेनां वार्ताश्रवणविधये सस्पृहं सावधानाम्।
रक्ष क्षीणां कुवलयदृशं मङ्क्षु स देशवाक्यै-
रार्तत्राणं भवति जगति श्रेयसो मुख्यहेतुः॥ ५४॥

भद्रे! पत्युस्तव कुशलिनो विद्धि मामस्तदूरं
कामं कामप्रसवविधये नित्यवन्द्यं वधूभिः।
नाविश्वासः स्मर इति भवेत् तन्वि! ते मद्व(श? शि)त्व-
ख्यातेर्मानं हृतहरवपुः सैव देवी भवानी॥ ५५॥

आस्ते कान्तः क्व नु कुशलवानित्यपाङ्गेन वेगात्
तन्व्या पृष्टे कथय वसतिं व्याघ्रपुर्यां स खिन्नः।
सीतादेव्यै रघुपतिरिव श्रीहनूमन्तमस्यै
तुभ्यं भद्रे! कथितहृदयः प्रेरयामास यो माम्॥ ५६॥

भद्रे! लीलावलयितदृशः पीनवक्षोजभाजः
शुम्भन्मन्दस्मितशशिसुधारञ्जिताशेषयूनः ।
श्रीशालिन्याः शरणरहिताद् विप्रयोगाद् भवत्याः
खिन्नस्यास्य प्रवदतितरां को नु तां तामवस्थाम् ॥ ५७ ॥

चन्द्रे दृष्टे दिनकरधिया वक्ति कान्तस्त्वदीयः
चण्डांशो! त्वं व्यथयसि कुतो मां विनैवापराधम् ।
जानीषे त्वं निशि निशि भृशं मादृशानामवस्था-
मम्भोजिन्या विरहविधुरो हन्त! दैवं विरुद्धम् ॥ ५८ ॥

वायो! सख्यं तव समुचितं वह्निना प्राणहर्त्रा
मय्यापन्ने दहनकणिकाजालविक्षेपमिच्छोः
भूयो मैत्रीं कुरु यमपुरीकिङ्करैरुद्धतैर्वा
रक्षोभिर्वा विदयमपि ते दुर्बलान् पीडयेयुः ॥ ५९ ॥

बाले! कान्तो विलपति रुतैर्मूर्च्छितः कोकिलाना-
मेवं घोषः किमयमशनिः किं नु मृत्योर्निनादः ।
जाने तन्वीकलरवविलासानुकारः पिकानां
कष्टं सोऽधिप्रातिहतविधेरद्य मे दुःखहेतुः ॥ ६० ॥

लीलावल्लीवलयनिलयाः प्रागमी तत्सकाशे
स्वर्गारामश्रियमनुपमां चक्रिरे ये मनोज्ञाः ।
ते हन्ताद्य प्रियजनवियोगार्तिभाजः प्रभूतं
कुम्भीपाकस्थितिमयमहो कुर्वते मे विषादम् ॥ ६१ ॥

एषा चञ्चत्कमलमुकुला लीनमीनप्रचारा
कूजद्भृङ्गीनिनदमधुरा मुक्तबन्धाम्बुपाता ।
वापी व्यक्तं शिवशिव! मया साम्प्रतं दृश्यमाना
न्यक्षेणान्तः सुरतचतुरां बोधयत्यम्बुजाक्षीम् ॥ ६२ ॥

इत्थं भूयो विलपति रुजा विप्रयोगेन खिन्न-
स्तस्मान्मानाहृदयसुभगे रक्ष्यतां तावदात्मा ।
दुःखव्रातं सकलमनुभूयापि ते सङ्गमार्थी
कान्तः पश्चात् स्वयमयमितो यावदायास्यति द्राक् ॥ ६३ ॥

स्वप्नं चित्रात् किमिदमधुना प्रोन्नते सौधशृङ्गे
लज्जाधिक्यस्थितिविषमया तन्वि! साकं भवत्या ।
क्रीडोद्योगे झटिति शमिते वायुना रत्नदीपे
प्रीतेनान्तःस्मयवति! मया य(त्) प्रसह्यान्यभावि ॥ ६४ ॥

प्रेमाधिक्ये सति विवदिते मध्यतो नौ सखीनां
वक्ता साक्षी शुक इति समे कल्पितेऽस्माभिरस्मिन् ।
एवं ब्रूहीत्युदितमनयेत्यर्धवाचि प्रकोपात्
पाणिक्लेशैर्वदनमरुणं तस्य किं तत् प्रलीनम् ॥ ६५ ॥

यावद्वीर्यं कुचहठहतिक्लेशवन्मान्निकर्षे
मानारब्धे महिषि! चतुरङ्गाह्वये नर्मभेदे ।
व्याजाद् भङ्गं गतवति मयि ज्ञाततत्त्वा सखीनां
दृष्ट्या रुष्टा सकलमहरस्तन्वि! तद्विस्मृतं किम् ॥ ६६ ॥

चन्द्राश्लेषाद्विकसति किमु द्रागियं पद्मिनीति
क्रीडाप्रश्ने मयि परिसरे शृण्वतीनां सखीनाम् ।
कान्ता जानात्ययि! तव विधामीदृशीमात्मवृत्त्ये-
तीत्थं कोपात् परुषमवदः साध्वि! तत् स्मर्यते किम् ॥६७॥

इत्थं वाचा मदन! महिषीमाश्वसंस्तत्र तिष्ठ-
न्नायास्यन्तं चरणगतिभिर्मां प्रतीक्षस्व तावत् ।
आयातेन द्रुतमिह (म)या साकमिन्दीवराक्ष्या
धन्यैर्धन्यैर्मतिनियमितैर्यावदर्चिष्य(तेऽसि) त्वम् ॥ ६८ ॥

इत्थं कृत्ये मदन! सकलेऽनुष्ठिते बान्धवीये
यास्यन्तं त्वां पदमनुपतन्नङ्ग! याचे कृतार्थम् ।
भूयो व्यापद्यमितसुखदं पश्यतां दर्शनं नो
भूयात् कर्तुं हितमपि कृपा ते पुनर्भाविनीति ॥ ६९ ॥

इति कामसन्देशः समाप्तः ॥

श्रीः

हंससन्देशः

श्रीमत्यम्भोरुहसुरभिते क्रीडतोः सप्रमोदं
लीलारामे गुरुनिधुवनक्लान्तधाम्नोः कयाश्चित् ।
यामिन्यां काचन निशिचरी भक्षितुं तं गृहीत्वा
लङ्कोद्याने सपदि सरमाकान्तवाचा मुमोच ॥ १ ॥

निःश्वासोष्मग्लपितदशनाच्छादनो लोचनाम्भः-
संसिक्ताङ्गो हिमरुचिरजःपाण्डुरो वीतनिद्रः ।
आशावल्लीनियमितमना दक्षिणाशासमीरा-
च्चन्दोस्रस्तः कतिपयदिनान्येष कृच्छ्रान्निनाय ॥ २ ॥

प्रत्यग्राम्रद्रुमकिसलयास्वादमाद्यत्पिकाळी-
वाणीरम्ये सरसिजवनीवासिताशे वसन्ते ।
अग्रे सोऽथ प्रमुदितमना निर्भरानन्दलक्ष्मी-
हेतुं हंसं मुनिरिव महानेकदैक्षिष्ट कामी ॥ ३ ॥

संपूज्यैनं सरसिजदलै राजहंसं मरन्दै-
रघ्यं चूतद्रुमसुमनसां सप्रमोदं वितीर्य ।
उद्यद्घोषाविरहदहनज्वालसंलीढचित्त-
स्तस्य प्रीत्यै श्रवणसुभगामेष तं वाचमूचे ॥ ४ ॥

आतङ्कोऽयं सुभग ! सुमहांस्त्यज्यतामाशु भीति-
स्थानं नाहं मम नयनयोः शीततेजःकरोऽसि ।
प्रत्यग्राम्भोरुहमधुरसं त्वं पिबाकण्ठमेतं
मारन्दार्द्रं सह वरटया भुङ्क्ष्व साधो ! मृणालम् ॥ ५ ॥

जानीमोऽमी सुमहितकुलोत्तंसमाणिक्यरत्नं
भूमौ लोके द्रुहिणभुवनादागतं तं भवन्तम् ।
सर्वेषां त्वं तदधिकतरो विष्किराणां पुनाति
ग्रीवां वेधाश्चरणरजसा यत्सुरौघार्थितेन ॥ ६ ॥

मामायुष्मन् ! कलय सहसा विह्वलं मित्रवर्गै-
र्दूरं नीतं हतविधिवशाद्वल्लभायाश्च तस्याः ।
तस्माच्छीघ्रं खगपरिवृढ ! (त्राणनाय?) व्रज त्वं
सन्देशं मत्प्रियसहचरीवासतेयीं गृहीत्वा ॥ ७ ॥

अर्थं स्वं यो वितरति जनः प्रार्थयन्तेऽर्थिनस्तं
हन्तेक्षन्ते न कृपणतया तत्र किञ्चिद्विशेषम् ।
सारङ्गौघा भृशमतुलया तृष्णया क्लान्तदेहा
धूमाकारं घनमभिनवं व्योममार्ग(स्त्व?स्थ)मेव ॥ ८ ॥

गाढोत्कण्ठाभृशलुलितयोर्वत्स(रा?रो)भू(र?द)यो(भृ?गे)-
नाशावल्लीधृतहृदययोर्नौ पुरा राजहंस! ।
भूयो दिष्ट्या प्रियसख! तयोरावयोः संगमोऽभूत्
काले तस्मिन् हतविधिवशाद्विप्रयोगोऽयमासीत् ॥ ९ ॥

प्राक् प्रेयस्या मम च रचितो विप्रयोगो निमेषै-
र्नूनं भ्रातः! सुनिशितमनःशल्यमासीदसीमा ।
आवामेवं विरहविपिनस्थात्मभूव्याधलक्षं
कुर्वाणस्तौ हतविधिरसावस्तु सम्पूर्णकामः ॥ १० ॥

आशाबन्धुः सरसिशदृशो विप्रयोगाकुलाया-
स्तस्मिंस्तस्मिन् व्यसनसमये प्राणरक्षां करोति ।
नूनं नष्टो भवति सुदृढो वैष कालातिपाता-
द्रक्षेत् को वा तदनु सततं शोकमात्रद्वितीयाम् ॥ ११ ॥

अध्वन्यस्मद्युवतिशरणं गच्छतस्तेऽनुकम्पा-
सिन्धो! व्योम्नो जित(हिरि?हरि)र(या?यं)वासरौ द्वौ [भवेताम् ।
शोकार्तस्य प्रियसख! यतो गोपदव्या महीभृत्-
कान्तारादिप्रतिहतगतेर्हायनं स्यान्ममास्य ॥ १२ ॥

यातव्यं ते युवतिनयनच्छायनीराजितं तद्
गौणावीचीचयमुखरितं कुम्भमालूरगेहम् ।
इक्षुश्रेणीकलितरशनं हंस ! यस्मिन् महीयो
माकन्दाख्यं नयनसुभगं मन्मथक्षेत्रमस्ति ॥ १३ ॥

पुंस्त्रीसंज्ञा विहगनिवहाः सन्तु सव्यापसव्ये
दृश्यन्तेऽग्रे नवसरसिजान्युल्लसत्पाटलाश्च ।
भास्वत्तप्ते खरकरमणीकल्पितारामवाटी-
प्राकाराग्रे ज्वलति दहनः कर्मसिद्धिस्ततः स्यात् ॥१४॥

पन्थानं त्वां प्रियसहचरीपत्तनं यातुकामं
भूयो ब्रूयादयमपि जनः सादरं श्रूयतां सः ।
मार्गे मार्गे नयनसुभगे सामिपुष्यत्पयोज-
प्रेङ्खद्भृङ्गावलिमुखरिते हंस ! विश्रम्य गच्छेः ॥ १५ ॥

तृष्णार्तोऽपि प्रियसख ! पयो नातिशीतं पिब त्वं
सद्यो नूनं भवति सुमहद्व्याधिजन्मैकहेतुः ।
तस्माद्वातैः कमलकणिकावाहकैर्वीततापो
भूयः पङ्केरुहसुरभितं प्रस्तरास्फालनाच्छम् ॥ १६ ॥

लङ्कामेतां कुरु दृगतिथिं रामामित्रेण गुप्तां
यत्रारामो दशमुखभुजावृन्दबन्दीकृतानाम् ।
स्वर्गद्रूणामनिशविगळन्नव्यमारन्दसिक्तं
यत्सौधानां स्खलति शिखरे निर्जराणां विमानम् ॥ १७ ॥

जायाचोरं विपुलमहिमा पीवरक्रोधपीत-
स्वान्तो रामो निशिचरवरं रावणं तं निहत्य ।
लङ्कामेतां तदनु सरमावल्लभायार्द्रचित्त-
स्तस्य भ्रात्र खगवर! ददौ यातुधानेश्वराय ॥ १८ ॥

आपृच्छयामून् सुभग! सहसा मित्रवर्गाननल्पान्
संप्राप्यास्मत्प्रियसहचरी(श्राणनं?) त्वं कुरुष्व ।
शोकग्रन्थिः क्षणमिव गदस्तीक्ष्णवेगश्छिनत्ति
प्राणान् नूनं विपुलविरहव्याळसंवेष्टितानाम् ॥ १९ ॥

आवर्ताम्भोनिधिमतिगुरुं(पाम?माक)रौघादियादो-
रुद्धं तीर्त्वा विपुलकरुणायानपात्राधिरूढः ।
सम्प्राप्याशु प्रियसहचरीवासतेर्यां भवांश्चेत्
क्रीणात्यस्मद्वचनकनकं लभ्यते पुण्यमूल्यम् ॥ २० ॥

लङ्कासन्ने प्लवगरचितः (पश्यतां?) रामसेतुः
पङ्कग्रन्थिं द्युमणिरिव यः शोषयत्येव सद्यः ।
एनं कर्तुं धरणितनयाकामुकः क्षुद्रवेगं
पारावारं व्यतनुत (गु?म)रुः स्वास्त्रतेजःप्रतापैः ॥ २१ ॥

पापौघघ्नो जनकतनुजाप्राणनाथप्रताप-
ग्रन्थ्यादर्शो नयनसुभगः पीवरो रामसेतुः ।
आमग्नायाः खगपरिवृढ! प्राणिवर्गैरजस्रं
पारं यातुं भवजलनिधेः कश्चनाध्वेव भाति ॥ २२ ॥

अद्याप्येष प्रियसख! विभोर्भीतचेता नितान्तं
सीताजानेः सरिदधिपतिः स्तोककल्लोलपातः ।
त्यक्तारावः प्रथितमहिमा दक्षिणे वत्सरार्धं
वामे चोर्मीस्तदनु कुरुते (पश्यतां?) रामसेतोः ॥ २३ ॥

राजच्चूतद्रुमकिसलयास्वादसंशुद्धकण्ठा
मेघश्यामः पिकखगगणः पञ्चमारन्दमत्तः ।
आलोक्यास्मत्प्रियसहचरीत्रासतेर्यीसमीपं
गच्छन्तं त्वामनुसरति तं सम्मदादुन्मुखोऽसौ ॥ २४ ॥

रक्षोनाथं युधि हतवता जानकीवल्लभेन
क्लृप्तं क्षेत्रं निखिलसुमनोमानुषैः सेव्यमानम् ।
अब्धेस्तीरे मरतकमयं हंस! रामेश्वराख्यं
भैषज्यं द्रागुरुमिव गदं पापसङ्घं छिनत्ति ॥ २५ ॥

नित्यं काशीसरित उदकैः कृत्स्नपापव्रजघ्नै-
र्नेत्राण्यार्द्राण्यवनिविबुधैरीश्वरस्य क्रियन्ते ।
आस्ते यस्मिन्नविरळरयो दर्पभाराद्धनूमान्
मग्ना(स्यारुदि?राति)स्तरणिकुलराड्दत्तभीमार्धभोगः ॥

आराद्वीक्ष्य क्षितिधरसुतेशस्य रामेश्वराख्यं
क्षेत्र पङ्क्ग्लपनविधये तादृशे तीर्थवा(रे?रि) ।
स्नात्वा स्नात्वा सुविमलमनोविग्रहः प्राप्य सोऽग्रे
ब्रूहीत्येवं मुकुटसदृशं प्राञ्जलिं मूर्ध्नि कृत्वा ॥ २७ ॥

क्रोधोज्जृम्भन्निजनिटिलदृक्पावकज्वालजाले
कल्पान्ते यो भुवननिवहं भूतिशेषं करोति ।
लीलाकोपप्रशमनविधिक्लृप्तनत्यामलाक्षा
शोणाब्जाय त्रिपुररिपवे तुभ्यमस्मै नमोऽस्तु ॥ २८ ॥

आनम्येत्थं तदनु नभसा क्षेत्रमेतं पदव्या
श्रीजानेर्दर्भशयनमिति ख्यातमारादमुष्य ।
गत्व सद्यः कुरु नतिमये! भार्गवीशाय तस्मै
यस्मिन् भेजे जनकतनयावल्लभः पाशिनं तम् ॥ २९ ॥

जायाचोरं प्रियसख! तपः कुर्वतो घोरघोरं
तस्मिन् वारान्निधितटतले जानकीकामुकस्य ।
अश्वत्थेन छदसमुदयैर्गीयते स्वप्रभावो
मूकैर्लो (लीलैः) स्फुटतरमये! सन्ततं दुष्प्रमेयः (?) ॥३०॥

चक्षुर्मार्गं प्रविशति ततस्ताम्रवर्णीनदी त्व-
द्रुष्मीच्छाम्भो निजतललसद्धारलक्ष्म्योज्ज्वलन्ती ।
रोधोयुग्मस्थविदुळवलद्दोस्तनीभूतकेशी-
वल्लीराजत्स्तबकपटलीस्रस्तमारन्दगन्धिः ॥ ३१ ॥

सोपानौघस्खलितपयसस्ताम्रवर्ण्याः स्रवन्त्या
भूदेवानां तटभुवि पुरीवृन्दमग्न्याहितानाम् ।
यूपश्रेणीकलितरशनं तद्धविर्गन्धयुक्त-
धूमस्तोमैः स्थगयति शुभैरभ्रशुभ्रैः सदाभ्रम् ॥ ३२ ॥

तीरद्वन्द्वस्थितवसुमतीपूर्वदेवप्रतीप-
स्नानग्रावस्खलितविमलं ताम्रवर्ण्यास्तटिन्याः ।
व्याकोशाम्भोरुहसुरभिलं तीक्ष्णभास्वन्मयूख-
क्रान्ताङ्गोऽयं प्रियसख ! पिब त्वं शुभं तूर्णमर्णः ॥ ३३ ॥

स्पर्धोद्रेकादकुरुत पुरा सस्यनाशाय घोरं
क्षोणीभर्तुः क्रतुभुगधिपोऽवग्रहं यस्य राज्ये ।
जृम्भत्क्रोधक्षुभितमनसा तेन सत्रावलेपै-
स्तस्य स्वीयैः सुनिशितशरैः सत्वरं ध्वंसि(ता?तो)सौ ॥३४॥

क्षोणीभर्तुः सहज ! मणल्लूराभिधानां महेन्द्र-
(ग्रावैः सृक्तां?) कनकसुधया लेपितां राजधानीम् ।
नाळीकाक्षीनिहतमुरवध्वानविद्धान्तरालां
राजच्चम्पावृतघनधिया पश्यतस्ते न भीतिः ॥ ३५ ॥

आसीनानां कुवलयदृशां सञ्चयः सौधशृङ्गे
वीक्ष्य छायां मणिविरचितप्राङ्कणेष्वापतन्तीम् ।
जातीपुष्पैर्मृगमदरसैः संयुतैरर्चयित्वा
माध्वी मूकभ्रमदरवशाद्रक्षति त्वां मुहूर्तम् (?) ॥ ३६ ॥

अम्भोजाक्षीकलितसुमनोमण्डलीमण्डिताङ्गं
गर्वोद्रेकाच्छुकखगगणैः पञ्जरस्थैरनल्पैः ।
आराद् दृष्ट्वा बिसकिसलयास्वादनोन्मत्तचित्तै-
र्नूनं वीणाक्वणनवचनैः स्वागतं वक्ष्यते ते ॥ ३७ ॥

सह्यो नाम क्षितिधरवरस्तुङ्गशृङ्गव्रजेन
स्वेनाक्रान्तं विबुधनिवहव्योमयानं निरुन्धन् ।
कूटोदञ्चज्झरधवलितावासतश्चन्द्रबाला-
बीजव्रातैस्तदनु भविता नेत्रयुग्मातिथिः सः ॥ ३८ ॥

उन्निद्रोष्णच्छविकरगणोत्तप्तसूर्याश्मपाली-
गर्भोदञ्चद्दुतवहशिखामण्डलीतर्जितौर्वः ।
क्रान्तं कुर्वन् वकुलकुसुमं सज्वरं सह्यशैलं
गच्छत्यस्मिन् भवति भविता हंस! मध्याह्नकालः ॥ ३९ ॥

कारुण्याब्धे! क्षितिधरवरे तत्र विश्रम्य गच्छे-
स्तस्मिंस्तस्मिन् झरतटतले वा निकुञ्जोदरे वा ।
अत्यायासाद्भवति नियतं जीवितस्यापि नाश-
स्तस्मादेतन्न कुरु विबुधैर्निन्दितं राजहंस! ॥ ४० ॥

तप्ते तीक्ष्णद्युतिमणिमये तास्थवांसो मृगौघाः
शृङ्गे शृङ्गे तदनु सहसा तापभाराद्विहाय ।
पुष्यद्वीरुत्स्तबकनिकरस्रस्तमारन्दसिक्तं
यस्मिन् वध्वा सह वननदीतीरकुञ्जं व्रजन्ति ॥ ४१ ॥

स्वीयत्रोट्या बिसकिसलयं चञ्चुगर्भे वितन्व-
न्नुत्फुल्लाम्भोरुहपरिलसन्नव्यमारन्दसिक्तम् ।
छत्रं कल्पन् विकचकमलं योषितं पुष्करस्थां
कोको यस्मिन् मदनसमरक्लान्तदेहां धिनोति ॥ ४२ ॥

यत्र स्नेहादुपरि कलयन् पुष्करेणाम्बुधारां
  शालू(षा?रा)णां कबलमसकृद्धेनुकास्वादितार्धम् ।
अश्नन् गण्डद्वयरणदलिः क्रीडते लोलकर्णः
  पक्षी वध्वा सह वननदीपुष्करे सप्रमोदम् ॥ ४३ ॥

रागीभूते तदनु मिहिरे वारुणीं भोक्तुकामे
  मन्दं मन्दं व्रजति सुमनोगन्धवाहे समीरे ।
पुष्यज्जातीरुचिधवलिते दिङ्मुखे कैरवाणां
  वृन्दे माध्वीमुचि खगपते! त्वं दिवा गच्छ सद्यः ॥४४॥

पश्चादस्य क्षितिधरपतेः पुष्कलः केरळाख्यो
  नीवृद् ग्रीष्मेऽप्युदकमनिशं मुच्यते वारिवाहैः ।
यत्रोत्तुङ्गाः परिणतफलस्तोमनम्रोत्तमाङ्गा
  वर्तन्ते ये मरिचवलिता नाळिकेराश्च पूगाः ॥ ४५ ॥

नात्यासन्ने धरवरसुता वर्तते सा कुमार्या
  नित्यं ज्योत्स्नापदकमलभाक् साम्परायाम्बुजानाम् (?) ।
निन्दन्ती स्वैरतनुलळनां कान्तिभारैरनल्पै-
  रेनां नत्वा सपदि शिरसा गच्छ लब्धप्रसादः ॥ ४६ ॥

वक्रो नाम क्षितिधरवरो वर्तते नातिदूरे
  वीतासूया यतिसमुदया यस्मिन्कुञ्जोदरस्थाः ।
कल्यात्मानः सुभग! महतामोषधीसञ्चयानां
  कुर्वन्त्यायुर्विपुलममरास्तेजसेवामृतानाम् ॥ ४७ ॥

उन्मत्तालीक्वणितरशना डाडिमोरोजकुम्भा
श्रृङ्गारोहस्थलपरिगलन्निर्झराम्भोदुकूला ।
पुष्यत्पुष्पा मधुसुरभिता शोणबिम्बाधरेयं
नेत्रानन्दं सुभग! कुरुते वक्रशैलस्थली ते ॥ ४८ ॥

तापिञ्छानां सति कवलिते तेजसा व्योम्नि वर्षा-
बुद्ध्या केकामुखरितदिशः प्रोल्लसत्पिञ्छभाराः ।
शुक्लापाङ्गाः कुसुमविगळन्नव्यमारन्दसिक्ते
वध्वा साकं मुदितमनसो यत्नितम्बे रम(न्ति?न्ते) ॥ ४९ ॥

अद्रावस्मिन् दरपरिलसन्मालतीसूनगन्धि-
स्तुङ्गप्रस्थच्युतझरपयोबिन्दुवाहः समीरः ।
अध्वश्रान्तिं मृदुतरगतिर्ध्वंसते प्रेमधामन्!
सद्यः पुंसां धृतिमिव सरोजेक्षणापाङ्गपातः ॥ ५० ॥

पीत्वा तोयं तदनु विमलं दक्षिणाशानभस्व-
च्छीतं भुक्त्वा बिसकिसलयं पद्ममारन्दसिक्तम् ।
सन्तुष्टात्मा सुभग! गिरिजानाथगेहं शुचीन्द्र
गच्छ क्षिप्रं भुवनमहितं देवराट्शुद्धिभूमिम् ॥ ५१ ॥

नित्यं भूतप्रभृतिभिरमा पार्वतीप्राणनाथो
यस्मिन्नास्ते निखिलविबुधैः सन्ततं सेव्यमानः ।
तस्म स्नेह स्फुटमिह जनैर्लोचनागोचराणा-
मालोकयन्ते प्रियसख! फलान्यात्मकर्मोत्कराणाम् ॥ ५२ ॥

गन्ता पापक्षपणनिपुणं धाम शम्भोर्भवांस्त-
यावत्तावत् खगवर! जगच्चक्षुरस्ताचलं च ।
तस्मादस्मिन्निवसतु भवानाप्रभातं शुचीन्द्रे
दोषज्ञौघो वदति रजनौ न व्रजेद् यो हितैषी ॥५३॥

त्वय्यभ्यर्णं चलति नतये वीक्ष्य पक्षद्वयश्री-
लिप्तं मृत्युञ्जयगलतलं नूतनाम्भोदमत्या ।
शुक्लापाङ्गः स्मरहरतनूजस्य नर्तिष्यति द्रा-
गीषन्मीलन्नयनजठरप्रोच्चरत्तारकोऽलम् ॥५४॥

नत्वा सन्ध्याक्षणपरिणतौ शैलराजात्मजेशं
गङ्गावीचीतरलितजटाभारसीमन्तचन्द्रम् ।
भूयः स्वप्यान्नयनसुभगे कुत्रचित् सौधशृङ्गे
कीनाशाशाहरिशिशिरिते राजहंसाप्रभातम् ॥५५॥

रात्रेरन्त्यप्रहरसमये वाशितैस्ताम्रचूडः
कान्ताश्लेषप्रमुदितमनःकामुकश्रोत्रशल्यैः ।
शश्वन्माद्यद्भ्रमरपटलीगानसम्भावितैस्तै-
र्मन्दं मन्दं खगवर! ततो नूनमुद्बोधयेत् त्वाम् ॥५६॥

अर्धोन्मीलत्सरसिजवनीनव्यमारन्दबिन्दून्
गृह्णन् वायुस्तदनु शनकैः कम्पयन्नाम्रशाखाः ।
पद्माक्षीणां मदनसमराद्विश्रमं सादितानां
कुर्वन् सद्यः सुभग! भजते वीतनिद्रं भवन्तम् ॥५७॥

पत्युर्मन्दं मृदुतरकरस्पर्शनेन प्रफुल्ला
पश्यन्ती तं चिरविरहितं रागिणं पद्मिनी सा ।
सम्फुल्लाम्भोजनयनचलद्भृङ्गिका तारका ते
नेत्रानन्दं कलयति रजोमण्डिता दुष्प्रमेयम् ॥५८॥

कान्तोऽमुष्यद्रमणि! भवतीं कालपाशाकुलो न
क्रोधाद् रागी भवति भगवान् पद्मिनि! प्रेक्षणीयः ।
गुर्वीमेतां त्यज मुकुळतां द्रागितीवाळिवर्गाः
शब्दायन्ते तटतलगता यत्र नित्यं प्रभाते ॥५९॥

तावत् प्राचीस्थितरविमहःसञ्चयाश्लेषणेन
स्वर्णभ्रान्तिं मरतकमणीकल्पिताप्यावहन्ती ।
ओकःपङ्क्तिः कलयति मुदं यत्र तेऽक्ष्णोर्मनोभू-
युद्धायासग्लपितललनाभूषिताळिन्दभूमिः ॥६०॥

आलोक्यास्यं विगततिलकं दर्पणेऽर्धाञ्जनाक्षि-
द्वन्द्वं दन्तव्रणपरिचितोष्ठप्रवालं स्मरन्त्यः ।
सम्भोगं तं युवतिततयो यत्र रोमाञ्चिताङ्ग्यः
सान्द्रानन्दात् किमपि न विदुः स्तब्धचित्ता नितान्तम् ॥६१॥

गच्छन्ती स्वं शरणमचिराज्जीवितेशस्य धाम्नो
मध्येमार्गं पथिकनिकरं वीक्ष्य यत्र प्रभाते ।
तारुण्यश्रीविहरणसमिल्लब्धकान्तां ह्रियासौ
मां वेत्तीति प्रसवनयना (लज्जितुं?जल्पितुं) लज्जतेऽहो!(?)॥

छत्रं चीनांशुकविरचितं शार्ङ्गपादं दधाना
स्निग्धं श्यामं रजतपटलीमण्डितं दण्डवर्यम् ।
मल्लीमालावलयितशिखाश्चन्दनालिप्तवक्षः-
फाला वेश्यायुवतिसदनं यत्र सीत्काः प्रयान्ति । ६३॥

प्रातर्नत्वा तदनु गिरिशं भक्तिनम्रेण मूर्ध्ना
स्यानन्दूरं दुरितनिकरच्छेददक्षं क्रमेथाः ।
पुष्पल्लाग्रप्रसवधवले गूढपान्नाथरूपे
तल्पे शेते सह कमलया पद्मया पद्मनाभः ॥ ६४ ॥

वञ्चीशस्य त्रिदिवसदृशी राजते राजधानी
यत्र स्निग्धस्फटिकमहसा ज्ञास्यते न त्रियामा ।
आसीनानां कुवलयदृशां हर्म्यपृष्ठे यदीये
क्लान्तिं शश्वन्मदनरणजां ध्वंसते स्वर्गवातः ॥ ६५ ॥

यस्मिन् वञ्चिक्षितिवलरिपौ स्पर्शने कल्पचित्ते
मन्दाक्षेण त्रिदिवतरवः सन्ति शुष्कप्रवालाः ।
कामः श्रेयो दहनमरणं मन्यते वीक्ष्य यं य-
त्तेजःसप्तार्चिषि शलभतां शात्रवौघैः प्रपेदे ॥ ६६ ॥

लीलारोहस्तनभरवधूनृत्तसङ्गीतरम्ये
सौधे तिष्ठन्नवनिवलभित सव्यतामित्थमेषः ।
देवौघेन प्रभुरिव वृषा वैजयन्ते निषण्णो
वर्णो नूनं भवतु न वृथा तादृशामीश्वराणाम् ॥ ६७ ॥

तुङ्गग्रावप्रमथितपयःसिन्धुवीचीवलक्षै-
स्त्रैलोक्येऽस्मिन्नयि! धवलिते निर्मलैस्त्वद्यशोभिः ।
पक्षाज्ञानात् क्रतुषु निहतेष्वर्थितो निर्जरौघै-
स्तारानाथे व्यतनुत विधिर्लक्ष्म शक्राश्मनीलम् ॥ ६८ ॥

ब्रह्माण्डेऽस्मिन्नयि! धवलिते भूपते! ते यशोभि-
श्चन्द्रं शैवं गिरिमपि पृथक् क्षीरपाथोनिधानम् ।
ज्ञातुं चिह्नं हरिमणिनिभं चार्धनारीश्वरं च
श्रीवत्सोराश्च कमलभुवा नूनमारोपि तेषु ॥ ६९ ॥

सन्मार्गस्थः सुविमलकलावृन्ददेदीप्यमानो
भास्वत्तारावलिवलयितो मित्रसंवर्धितात्मा ।
लक्ष्मीवान् गोजितबुधकविश्चक्रवर्ती तमोनुद्
राकाशीतच्छविरिव भवान् राजते राजराजः ॥ ७० ॥

स्यातां मार्गौ तदनु वनितामन्दिरं गच्छतस्ते
द्वावत्रैकः क्षितिधरवनग्रावरूक्षः कदध्वा ।
अम्भःपाथोनिधितटतलो हंस! तैस्तैर्विशेषैः
शक्यो ज्ञातुं सुखमयि सखे! तेन मार्गेण गच्छ ॥ ७१ ॥

भूयो वारान्निधितटतले हंस! कोळम्बनामा
देशः कश्चिन्निखिलनयनप्रीतिहेतुर्महीयान् ।
शीधून्मत्तप्रसवनयनापादनालीकचञ्च-
न्मञ्जीरालीमुखरितमहाहर्म्यवर्यौघगर्भः ॥ ७२ ॥

पुष्यल्लोध्रप्रसवसुमनोधूसरा हूणलोका
मत्तात्मानो नवमदिरया चोळसञ्छादिता(ङ्गाःङ्गाः) ।
तत्ताहग्भिः प्रियसख! समं कामिनीभिर्मनोज्ञ
प्रासादानां महति शिखरे यत्र नित्यं रमन्ते ॥७३॥

दृष्ट्वा दृष्ट्वा तव मधुरतां छद्मकर्मप्रवीणा
ये हूणौघा विपुलमतयस्त्वां ग्रहीतुं यतन्ते ।
तेषां कृत्वा खगवर सखे! वञ्चनां द्रागुपायै-
स्तैस्तैर्भूयः सरिदधिपते रोधसा तेन गच्छ ॥७४॥

नात्यासन्ने प्रियसख! नभोनिम्नगायां महीयान्
साक्षात् कृष्णो विलसद(दौत)सौदामनीलप्रतीकः ।
चाम्पेयस्रग्वलयिततनुः स्वर्णपीठे सुमेरौ
चम्पाश्लिष्टो जलधर इव भ्राजते प्रावृषेण्यः ॥७५॥

शश्वद्भास्वन्मरतकमणीनिर्मितोत्तुङ्गभित्ति-
श्रेणीनिर्यन्निरुपममहःकल्पितेन्द्रायुधाभ्रम् ।
तस्य क्षेत्रं दितिसुतरिपोरुज्ज्वलद्दीपपाळी-
ज्वालापूतं नयनसरणिं हंस! गन्ता त्वदीयम् ॥७६॥

आहूताभिः श्रवणमधुरैर्वेणुनाळीनिनादै-
र्गोपस्त्रीभिः सह विधुमहोमूर्छितायां निशायाम् ।
वृन्दारण्ये विकचसुमनोवासिते योऽरमत् प्राग्
बाल्ये तस्मै भवतु भवते श्यामधाम्ने नमोऽस्मै ॥७७॥

एवं नत्वा हरिपदयुगं चिन्तितावाप्तिहेतुं
प्रत्यग्राम्भोरुहमधुरसं काममास्वाद्य गच्छ ।
तांस्तान् देशानथ कवचितान् पाकपिङ्गप्रकाशै-
र्व्रीहिस्तोमैर्नयनयुगलप्रीणना(नृक्ष? न्द्रक्ष्य)सि त्वम् ॥७८॥

लोलद्वीची(चय)मुखरिताशान्तरा तीरभूमी-
सोपानौघस्खलितकमला वासिता पद्मगन्ध्या ।
केतक्यालीवलयिततटा मण्डिताकण्ठमग्नैः
स्त्रैणास्याब्जैः कलयति मुदं नेत्रयोरङ्ग! गौणा ॥७९॥

कीनाशाशासततगविना वासितायाः स्रवन्त्याः
स्वच्छालोक्यस्वतलसिकतासञ्चयाया जलेषु ।
सङ्क्रीडन्ते पुरुषनिकराः सन्ततं स्त्रैणचक्षुः-
श्यामाब्जस्रग्वलयितगळा जृम्भदानन्दमन्दाः ॥८०॥

अम्भोनीवीविरहितमहत्सैकतारोहचक्रा
पाथोजास्या सुविमलरसा लोलकल्लोलहस्ता ।
ऊर्म्यग्राश्चत्कमलकर्णिकाहारमाला कथं सा
कुर्यात् प्रीतिं न चलशफरीलोचनावर्तनाभिः ॥८१॥

गौणावात्याविचलितदलान्योन्यसङ्घट्टनोत्थ-
ध्वानाद् भीतैरिव खररुचेर्मुच्यते रश्मितापैः
यस्याभ्यर्णश्चलदलतरुः (सेव्यतां) सप्रमोदं
तत्तीरस्थो द्युमणिकिरणक्रान्तधाम्ना त्वया सः ॥८२॥

शैवालालीचिकुरभरया सैकतश्रोणिभूमी-
गुञ्जद्धंसव्रजरशनया गौणयाश्लेषितं तत् ।
इक्षुश्रेणीपुळककलितं कुम्भमाल्लूरगेहं
प्रेक्षिष्यन्ते चलदलतरौ तस्थिवांसो भवन्तः ॥८३॥

* पूर्वभागः समाप्तः ॥

---

* प्रथमसन्देशः समाप्तः । Ms.

उत्तरभागः ।

पक्षद्वय्याः कनकमहसस्तेजसाश्लेषितेषु
प्रासादौघेष्वहिरिपुमणीकल्पितेषून्नतेषु ।
वर्षाबुद्ध्या भवनशिखिनः कुर्वते सप्रमोदं
लास्यं केकामुखरितदिशो यत्र राजच्छिखण्डाः ॥ १ ॥

ताम्यत्कोकद्विजयुतमहल्लोचनद्वन्द्वनिर्य-
न्मन्दोष्णाम्भोद्विगुणितपयोराशिकासारसङ्घः ।
सायङ्कालः सुभग! भविता पान्थलोकासुचोरो
यावद् गन्ता ध्रुवमयि! भवान् कुम्भमाल्लूरगेहम् ॥ २ ॥

अप्पत्याशां करकिसलयैर्गाढमालिङ्गयन्तं
रक्तैर्वक्षोजकलशलसत्कुङ्कुमाश्लेषणेन ।
आलोक्यासावशिशिररुचिं ध्वान्तवासोमतल्लचा
मा स्म द्राक्षीदिति हरिहरित् प्रावृणीते स्वमास्यम् ॥ ३ ॥

स्वीयं कान्तं तमरुणकरं तेजसामेकपात्रं
कल्याणानां निरुपमगुणं रागिणं सन्निधाय ।
अस्तक्षोणीधरकुचभरे पीवरे पश्चिमाशा
रक्ता भुङ्क्ते मुदमविरळां शोणपाथोदवासाः ॥ ४ ॥

यापां पत्या सह कुमुदिनीं दीप्यमानेन भास्व-
 त्तारावल्या सुविमलकलासञ्चयेन प्रफुल्लाम् ।
राजज्ज्योत्स्नानिहततमसा क्रान्तपाथोजवक्त्रा
 दृष्ट्वा खेदाद्भ्रमरनिनदैः पद्मिनी रोदितीव ॥ ५ ॥

गौणावीचीकमलकणिकावाहको मन्दमन्दो
 गृह्णन्नीषद्विकचसुमनःपुष्पमारन्दबिन्दून् ।
वामाक्षीणां दिनपरिणतौ दाक्षिणाशासमीरो
 मानोद्रेकं दृढतरमपि ध्वंसते यत्र नित्यम् ॥ ६ ॥

आतन्वानः कुसुमविशिखान् यत्र तान् दोर्मतल्लया
 चेक्ष्विष्वासं मुदितमधुलिड्वन्दिभिः स्तूयमानः ।
ध्वस्तामित्रो जयति मरुता मन्त्रिणा गृह्णतालं
 साकं कामो विकचसुमनःपुष्पगन्धोपहारान् ॥ ७ ॥

पण्यस्त्रीणां निजसखिजनैरर्थितो वेशवाटीं
 गत्वा तैस्तैर्मधुरवचनैस्तद्वशास्ता विधाय ।
(सिलकीसील्क)स्तोमौ दिनपरिणतौ यत्र सन्देशमाध्व्या
 तेषामार्द्रं चलति सहसा श्रोत्रयुग्मं विधातुम् ॥ ८ ॥

वीटीगर्भाननसरसिजः पादुकालङ्कृताङ्घ्रिः
 स्वर्णोष्णीषो धवलवसनस्तालवृन्तं दधानः ।
रत्नोत्तंसद्वयसुषमया दिङ्मुखं शोणवर्णं
 कुर्वन् यत्र स्वयुवतिगृहं कामिलोकः प्रयाति ॥ ९ ॥

ज्योत्स्नाश्वेतस्मितनिहतपुंधैर्यसारा मृगाक्ष्यो
यत्रालोलन्मरतकमणीकर्णिकाकर्णपाशाः ।
औशीराम्भःस्नपनविमलाः सूक्ष्मशुक्लांशुकान्त-
र्लक्ष्योरोजा रमणशरणं तुष्टचित्ता व्रजन्ति ॥ १० ॥

निन्दन्तीनां निजगुणगणैर्यत्र नारीसमूहा
नासां भेदं कुवलयदृशां चिन्तयन्नल्पशोऽपि ।
त्यक्त्वा नेत्रच्छदमकुरुत स्वर्गसीमन्तिनीश्वे-
न्मुग्धौघानां परिषदि सदा माननीयो विधाता ॥ ११ ॥

आसीनानां मरतकमणीवेदिकायां वधूनां
रम्ये वक्त्रे मधुसुरभिते सञ्चरन्नब्जबुद्ध्या ।
यत्र क्षीबो मधुकरगणः पुष्पकेतोर्धनुर्ज्या-
घोषभ्रान्तिं कलयति सदा त्रातुमारात् स्थितस्य ॥ १२ ॥

निन्दन्तीनां सुविमलगुणैः कृत्स्ननारीरजस्रं
स्वीयैरल्पं कुवलयदृशां चिन्तयन् यत्र भेदम् ।
त्यक्त्वा वर्त्मद्वितयमकरो(त्स्वै?स्व)र्गसीमन्तिनीश्चे-
न्मुग्धौघानां परिषदि सदा श्लाघनीयो विधाता ॥ १३ ॥

शृङ्गालोलध्वजपटततीघर्षणाधूतयाभा-
यासोद्भूतश्रमजलकणस्वर्गयोषिन्मुखेन्दुः ।
यत्र ज्योत्स्नाविशदसुधयालेपितो हर्म्यसङ्घः
कुर्यात् तेऽलं मरतकमणीचित्रितश्चित्रमक्ष्णोः ॥ १४ ॥

उत्तुङ्गानां मरतकमणीकल्पितानां पताका-
सङ्घः भृङ्गावलिषु कलितो यत्र हर्म्योत्तराणाम् ।
प्रासादस्थत्रिदिववनितावक्त्रलोलो भवत्यो
भग्ना हैतद्युवतिभिरमूरित्यहो पृच्छतीव ॥ १५ ॥

उत्तुङ्गानां स्फटिकशिखरे यत्र सौधावलीना-
मासीनानां मृगमदरजोभूषितं कामिनीनाम् ।
आस्यं मन्दस्मितरुचिसुधास्यन्दि वीक्ष्येन्दुमत्या
मन्दाकिन्याः सरसिजवनी मीलितास्ते दिवापि ॥१६॥

आस्यैर्यत्र स्मितवलयितैः सुन्दरैः सुन्दरीणां
भूमिस्थानां भृशमधरितः प्राङ् ननन्दोपरीति ।
सौधस्थानामथ नु कलयंस्तानि तासां भवामि
द्वेधेदानीमहमिति चिरं खि(न्द्य)ते मन्दमिन्दुः ॥१७॥

यत्रोच्छ्रायच्छुरितगगनान्युज्ज्वलद्रुक्मभित्ति-
प्रत्युप्तोद्यद्धरिमणिगणच्छायसम्मेलितानि ।
लीलालास्ये कलितमुरजध्वानरुद्धानि सौधा-
न्यालिङ्गयन्ते जलदपटलैः सन्ततं मित्रबुद्ध्या ॥ १८ ॥

यत्रोत्तुङ्गे कुवलयदृशां हर्म्यपृष्ठे स्थिताना-
मब्जामित्रं वदनशशिनं वीक्ष्य देदीप्यमानम् ।
दोषाबुद्ध्या नयनसलिलैराप्लुतः खि(न्द्य)तेऽलं
चक्रस्तिष्ठन्नखिलजनहृन्नन्दने नन्दनेऽह्नि ॥ १९ ॥

स्वर्गोद्याने विबुधमिथुनं बाहुनोन्मुच्यमाने
नीवीबन्धे प्रमदकलितस्वान्तमालोक्य बिम्बम् ।
यत्सौधानां हिमकरमणीकुट्टिमेष्वन्यमत्या
कर्तुं नैव प्रभवति रतं निर्भरापत्रपार्तम् ॥ २० ॥

उत्तुङ्गानां मरतकमये यत्र सौधावलीनां
शृङ्गे योषा नयनसुभगाः कल्पिताः शिल्पिवर्यैः ।
आश्लिष्यन्ते सपदि तरुणैः सत्यमत्या मनोभू-
-नालीकालीनिहतधृतिभिर्गाढमानन्दमन्दैः ॥ २१ ॥

धत्ते भर्तुर्मसृणनखरोल्लेखनाद्यत्र वक्षो-
भूरापीनः कुवलयदृशां लोहितानि व्रणानि ।
आलोक्यारात् त्रिदिवकरिणस्तुङ्गकुम्भद्वयश्री-
नन्द्याक्रोधज्वलितमनसः स्थूलशृङ्गाभिघातात् (?) ॥ २२ ॥

तप्तस्वर्णद्रवविरचितोत्तुङ्गसालालिजृम्भ-
त्तेजोराशिप्रतिहतमहामेरुशोभावलेपम् ।
माकन्दाख्यं मदनशरणं तुङ्गरुक्मध्वजाग्र-
भ्राजन्मीनं विलसति सदा मञ्जु गौणाप्रतीरे ॥ २३ ॥

गानैर्वीणामुरवपणवैर्मूर्च्छितेषु प्रदोषे
भृङ्गैः शङ्कैर्मरतकमणिस्तम्भसम्भावितेषु ।
यत्र श्यामा गुरुकुचभरश्रान्तमध्याः सुकेश्यो
नृत्यन्त्युद्यच्छ्रमजललवैर्मण्डिता मण्डपेषु ॥ २४ ॥

श्च्योतन्माध्वीकणकुरबकस्रक्छटामण्डितोरा-
श्वेतोजन्मा कुसुमविशिखांश्चेक्षुचापं दधानः ।
स्फायद्भक्त्युद्वहनविनमन्मूर्धनारी(ष्टीड्य)मानो
रत्या साकं विलसति सदा यत्र गाङ्गेयपीठे ॥ २५ ॥

क्रोधोद्रेकात् कुसुमविशिखैः सत्वरं मोहयित्वा
बद्ध्वा भूयः सुमहदगजाभ्रूलताश्रृङ्खलेन ।
नीतो येन स्वरिपुगिरिशः सामिनारीशिताख्यां
कारां तुभ्यं नम इति सदा यत्र योषाः स्तुवन्ति ॥ २६ ॥

कर्णालोलन्मरतकमणीकर्णिकादीप्रगण्डाः
कम्रोत्तुङ्गस्तननिहतपुंधैर्यसर्वस्वसाराः ।
रक्ताङ्गुल्यावलिरुचिचयश्यामलाशावसानाः
सद्धोद्धर्षं(?) कुवलयदृशो यत्र सम्भावयन्ति ॥ २७ ॥

तस्याभ्यर्णे मरतकमणीक्लृप्तसोपानपङ्क्ति
स्निग्धं भास्वत्स्फटिकपटलीनिर्मितोत्तुङ्गभित्ति ।
नेत्रद्वन्द्वप्रमदजनकं गोपुरं द्रक्ष्यसि त्वं
धीमन्! यत्र प्रियसहचरीवासतेयी भवेत् सा ॥ २८ ॥

गाङ्गेयाम्भोरुहसुरभिता मण्डिताल सुरभ्या
वस्त्रौघेनाप्यखिलसुमनोवासदेदीप्यमाना ।
रम्भास्वादप्रमुदितमनःकौशिका वासतेयी
मद्देहिन्या विलसति सुधाशीतला स्वर्गपूर्वा ॥ २९ ॥

सौधश्रेणीस्फटिकशिखरे संयुते वैजयन्ती-
सङ्गे नीते सततगतिना तारकानाथबिम्बम् ।
चित्रं चित्रं शिशिरकिरणं पर्वणः सैंहिकेयो
भुङ्क्तेऽन्यस्याममुमिति तिथौ यत्र लोका वदन्ति ॥ ३० ॥

तारानाथच्छविसितसुधामण्डिता स्निग्धभित्ति-
र्युक्तः शृङ्गैर्वनकरिपतेर्निर्मितैर्जालजालैः ।
मार्गोन्मिश्रैर्मलयजरसैः सिक्तगर्भो महीयान्
लीलासौधो नयनसुभगो वर्तते मत्प्रियायाः ॥ ३१ ॥

तस्मिन् युक्ते प्रियसख! लतावेष्टितैः स्पृष्टकार्यै-
श्चाभ्यासार्थं मुकुरलिखितैश्चित्रवृक्षाधिरूढैः ।
रम्ये मञ्चे विकचसुमनोवासितातात्रशय्ये(?)
शेते नित्यं प्रियसहचरी नातितुङ्गोपधाने ॥ ३२ ॥

सौधस्यास्य स्फटिकशिखरे दन्तिशृङ्गप्रणीते
शारी काचिद्विलसति सदा पञ्जरे मुग्धवाणी ।
श्लोकान् शश्वत् कथयति मनोमोहनान् व्यक्तवर्णं
सालङ्कारान् मम दयितया दक्षया शिक्षिता सा ॥ ३३ ॥

एवं मय्या नयनसलिलैरार्द्रया (रूषतो?रूषितं) त्वं
कृत्वा नेदं कलय वदनं तारकानाथतुल्यम् ।
अद्यैव त्वं कमलवदने! द्रक्ष्यसि प्राणनाथं
सेदा(नीत्थं?नीं तां) कथयति सखीभाषिताकर्णनेन ॥ ३४॥

पाटीरद्रूमणिरचितसद्वेदिकौ कोमलौ द्वा-
वुन्मत्ताळीव्रजमुखरितौ मत्प्रणीतौ महान्तौ ।
कुर्वाते ते परिणतफलस्तोमनम्राग्रशाखा-
पाळीरुद्ध्युमणिकिरणौ लोचनानन्दलक्ष्मीम् ॥ ३५॥

तन्मूलस्थे सुभग(गणि?लति)के द्वे दरोत्फुल्लपुष्पे
मन्दं मन्दं किसलयकरैर्लोहितैस्तौ स्पृशन्त्यौ ।
कुर्वाते दृक्प्रमदमतुलं कान्तया कुम्भवक्षो-
जान्तश्च्योतत्सुमधुरपयोराशिभिः पोषिते ते ॥ ३६॥

माद्यत्केकिद्विजगुरुगरुद्युग्मविक्षेपणोद्य-
द्वाताधूतक्रकरकुसुमस्रस्तमारन्दसिक्तम् ।
गौणातीराभरणमलघुर्निन्दति प्राणनाथा-
लीलारामो न निखिलमनोनन्दनो नन्दनं न ॥ ३७॥

उन्मत्तानामयि! मधुलिहां मूर्छिते मुग्धगानै-
र्गौणावीचीमुरवनिकरैर्वैणवैः कीचकैश्च ।
जातीरामा सततगतिना प्रेरितोद्यन्मरन्द-
स्वेदा(लु?लि)प्रस्तबकवदना यत्र नृत्यत्यजस्रम् ॥ ३८॥

वासन्तीनां मुकुलनिकरांश्चुम्बितान् भृङ्गसङ्घै-
रोपांस्तीक्ष्णान् क्षुभितमनसो मन्मथस्यायसाग्रान् ।
पान्थौघानां हृदयकुसुमच्छेदनायेति मत्वा
मत्कान्ता सा विरहदहनज्वालदग्धा बिभेति ॥ ३९॥

कीरत्रोटीपुटविदलितैर्दाडिमीबिम्बितानां
स्निग्धैरेतैः परिणतफलैर्दन्तवासःप्रवालौ ।
भग्नौ दन्तव्रणनखपदैर्विप्रयुक्तौ महान्तौ
वक्षोजौ द्वाविति विरहिणी खि(न्दीद्य)ते सुन्दराङ्गी ॥४०॥

श्च्योतन्माध्वीश्रमजलकणाः किञ्चिदुत्फुल्लपुष्पा
रक्तालोलत्किसलयकरा मत्तभृङ्गालिवाणीः ।
वीरुत्पङ्क्तीर्नयनसुभगाश्चुम्बिता गन्धवाहै-
र्वीक्ष्येदानीं निवसति दृशौ मीलयित्वा प्रिया सा ॥४१॥

किं वा मूर्तैः पथिकवनिताघातजैर्दुर्यशोभिः
संश्लिष्टाग्रान् किमु विरहिणां कालखण्डैर्जनानाम् ।
तीक्ष्णान् बाणानिति रतिपतेर्हिङ्गुदीपादपानां
वीक्ष्य स्निग्धान् मुकुलनिकरान् मन्यते वल्लभा सा ॥४२॥

दृष्ट्वा वक्रं मुकुलपटलं वातपोतद्रुमाणां
जन्त्वौघानां बळिशनिकरं विप्रयोगाकुलानाम् ।
गाढालोलान् हृदयनिकरानाददातुं मनोभू-
दाशस्येति प्रियसहचरी मन्यते दीनचेताः ॥४३॥

यैर्निर्यत्नं विरहविवशा हन्ति शृङ्गारयोनी
रामाः क्रोधज्वलितहृदयस्तद्वदस्मानितीव ।
त्यक्तान् सर्वैर्मधुकरकुलैः कोरकान् स्वर्णवर्णा-
श्चाम्पेयानां पिबति दयिता लोचनाभ्यां सखेदम् ॥४४॥

कान्तामित्थं कुसुमितवनीदर्शनान्मूर्छितां तां
शय्यां नीतां किसलयमयीमाकुलाभिः सखीभिः ।
शैवालौघैर्बिसकिसलयैरङ्कितक्रोडमध्यां
लीलारामे मलयजजतटे द्रक्ष्यसि त्वं खगेश ! ॥४५॥

नेत्रे पद्मं वपुषि सुभगे केसरं गण्डपाळ्यां
लोध्रं कुन्दं मधुरहसिते मार्दवेऽच्छं शिरीषम् ।
रोमाञ्चौघे प्रियकमुकुलान् स्वप्नसम्मेलनोत्थे
धत्ते लक्ष्मीं प्रियसहचरी सैव षण्णामृतूनाम् ॥४६॥

वक्षःक्षिप्तैर्बिसकिसलयैः सिक्तशीतोदकैश्च
प्रालेयाम्बुस्नापितसुमहत्तालवृन्तानिलैश्च ।
श्वासो(लोस्ति?च्छ्वासैः) स्फुरति हृदयं मन्दमेतीव संज्ञा-
मेषा कामज्वरकवलितेत्याळिलोका वदन्ति ॥४७॥

तां निःश्वासश्वसनचलितोत्तुङ्गवक्षोजकुम्भा-
मास्राम्भोभिः कलुषवदनां कज्जलाक्तैरनल्पैः ।
कान्तां तल्पे किसलयमये सन्निषण्णां वियोग-
व्याधिक्रान्तां कथमिव भृशं खि(न्द?द्य)से नो विलोक्य॥

प्राणेश्वर्या विकचसुमनोदामकान्तेरमुष्या
मूर्ध्नि श्यामः कुवलयरुचिः पुष्कलः केशभारः ।
चाम्पेयस्रङ्निचयकलितस्तोयवाहो हिमाद्रौ
विद्युन्मालावलयित इव भ्राजते नीलधामा ॥४९॥

प्राणेश्वर्या नयनसुभगैरायतैर्मौलिभारैः
श्यामैरेतैरखिलशिखिनां कोमलं बर्हिवृन्दम् ।
निर्यत्तं द्राक् परिहसितमित्यात्मभूः कुण्डलं किं
नैवैतेषु व्यतनुत पुरा मेचकौघच्छलेन ॥ ५० ॥

धम्मिल्लैस्तैर्जलधरगणो निन्दितो व्योम्न्यजस्रं
भ्राम्यन् क्लेशात् स्वरसितमिषाद्रोदिति प्रावृषेण्यः ।
स्निग्धैरस्याः कुवलयदृशा गर्हितात्मीयवालो
व्रीळामूढश्चमरनिकरो वर्तते काननेषु ॥ ५१ ॥

वक्त्रं तस्याः कुवलयदृशः फालदेशस्य तुल्यं
कर्तुं बिम्बं कलयति कृशं श्यामले कोमलस्य ।
भूयः पूर्णं गुणगणनिधेस्तस्य पक्षे वलक्षे
वक्त्रस्येत्थं शिशिरकिरणः सेवते क्लेशभारम् ॥ ५२ ॥

द्वेधा कृत्वा व्यतनुत विधिस्तद्भ्रुवौ मारचापं
शम्भोः फालस्थितशुचिशिखाश्यामळं मत्प्रियायाः ।
कामेनेषुच्युतबहुरजःपाण्डुमध्यं धनुः स्वं
किं वाधायि त्रिभुवनमिदं फालमूले विजित्य ॥ ५३ ॥

प्राणेश्वर्या मधुरनयनद्वन्द्वलक्ष्मीकणायि:-
प्राप्तैं रात्रिन्दिवसमुदके पल्वलानां पवित्रे ।
स्थित्वा कृत्स्नैः कमलनिकरैर्दुःसहानि क्रियन्ते
गोकर्णाघैर्वनभुवि तृणं भक्षयद्भिस्तपांसि ॥ ५४ ॥

निर्मातीव प्रतिनिधिगणान् दर्पशान्त्यै तदक्ष्णो-
रद्यापीत्थं कुवलयजपापुण्डरीकाणि वेधाः ।
भीतौ नूनं कमलनिकरौ तारकेशाननायाः
कान्तादस्या नयनयुगलाद्यद्वने तौ भजेते ॥५५॥

भ्रूकोदण्डद्वितयमुपरिभ्रान्तमालोक्य चक्षु-
र्मत्स्यद्वन्द्वं व्रजति किमुत श्रोत्रकूपौ महान्तौ ।
मत्कान्ताया हसितनयनालोचनाभ्यां चकोरो
ज्योत्स्नाहारः कलयति तपस्तद्गुणाप्त्यै नितान्तम् ॥

आलोक्याह्नि स्वमधरमलं नेत्र(युग्मान्निर्गमं)निशायां
नाळीकौघः कलयति तपः शोकसङ्कोचितोऽस्याः ।
मत्प्रेयस्याः सुभगनयनद्वन्द्वलक्ष्मीकणीयो-
लाभाद्भीतिर्भवति नितरां प्रीतिहेतुर्मृगाणाम् ॥५७॥

नाळीकेषोस्त्रिभुवनमिदं जेतुकामस्य वान्ये
मौर्व्यौ श्लक्ष्णे नयनसुभगे (प्रतनाशो?प्राप्तनाशे) पयोजे ।
लीलाडोळे किमुत सुमनोधन्विनस्तत्प्रियाया-
श्चालोले द्वे सरसिजदृशः कर्णपाशावमुष्याः ॥५८॥

यूनां भूयानधिगतवपुः प्राणिनां वानुराग-
स्तत्राभाति स्फुटमिति भृशं भ्रान्तिमातन्वतोऽस्याः ।
भीतौ दन्तच्छदकिसलयात् सुन्दराङ्ग्याः प्रवाळौ
द्वा(वध्यास्ते?वासाते) गहनतटिनीनाथकान्तारमध्ये ॥

अस्या मन्दस्मितरुचिलवं चेल्लभेत त्रियामा-
कान्तो नूनं बहुलकिरणः कृष्णपक्षेऽपि स स्यात् ।
भीतोऽस्यर्थं विकचसुमनस्तल्लजो मन्दहासा-
न्नो यद्यास्ते वनभुवि दिवा किं स सङ्कोचितश्रीः ॥ ६० ॥

वैधव्येन स्मरचलदृशस्त्यक्तभूषामतल्लया
हारस्रग्भ्यामजदगनलप्लुष्टशृङ्गारयोगैः ।
क्लृप्तादस्या रदगणयुगान्मौक्तिकौघोऽस्तभी(तो?तो)
ली(नौ?नो) मु(क्ता?क्तो) द्विरदवरभूदारपथादिकेषु ॥ ६१ ॥

अस्या मत्तद्विपवरगतेरुल्लसद्वक्त्रलक्ष्मी-
लेशप्राप्त्यै कमलनिकरो निम्नगाशम्बरेषु ।
तिष्ठन् नित्यं कलयति तपो घोरघोरं स राजा
नक्षत्राणां सरिदधिपतेः स्नाति तोये पवित्रे ॥ ६२ ॥

शश्वत् श्च्योतन्नयनपयसां बिन्दुभिः श्यामळानां
मध्याश्लिष्टं कुवलयदृशः पुष्कलं वक्त्रबिम्बम् ।
अस्याः काष्ठाकमनतनुजानिम्नगापुष्कराणां
लेशैर्जुष्टं सरसिजमिव भ्राजतेऽलं (प्रवृत्तम्?)पवित्रम् ॥ ६३ ॥

वक्त्रस्यास्ते हिमकरजया नैव कीर्तिः सदा तद्-
द्विण्नेत्राब्जद्वयमतितरां यस्य मैत्रीं करोति ।
द्वेधा कृत्वा हरिमणिनिभं लक्ष्म धत्तां निजं चे-
देतस्या भ्रूयुगमिव भवेदास्यतुल्योऽमृतांशुः ॥ ६४ ॥

भूयो भूयो द्विपवरगतेराननं निष्कलङ्कं
चास्या वृत्तं नयनसुभगं स्वं कलङ्काङ्कितं च ।
दृष्ट्वा दृष्ट्वा प्रतिदिनमहो तच्छमायैव राजा
नक्षत्राणां कलयति जलैः क्षालनं वारिराशेः ॥ ६५ ॥

पश्चाद्धत्तां यदि हिमकरो दैवतः स्वीयमङ्कं
वक्त्रस्यास्या भवतु सदृशः पृष्ठराजत्कचस्य ।
नूनं जातु ग्लप(य)तु (च?) न चेत्तेजसा शीतभानोः
कान्तायास्तद्भवतु च चिरादास्यतुल्यं सरोजम् ॥ ६६ ॥

रत्नाङ्गुल्यावलिरुचिमनोमोहनाभ्यां मृदुभ्यां
दोर्दण्डाभ्यां कुवलयदृशः कोमलाभ्याममुष्याः ।
भीतैः सद्यो न फणिभिरधोविष्टपं किं प्रपेदे
लोकादस्माद्बिसकिसलयैः सिन्धुपङ्कोदरं च ॥ ६७ ॥

लीलाशैलौ रतिमदनयोरुल्लसद्रत्नमाला-
तेजोजुष्टौ नयनसुभगौ किं महान्तावुरोजौ ।
मत्कान्तायाः किमुत रतये दर्पकायोपहारा-
वस्याः स्निग्धौ स्मरसखवयोनिर्मितौ स्वर्णकुम्भौ ॥ ६८ ॥

अभ्यर्णस्थां मदननगरीं सूचयन्ती सुदीर्घा
श्यामा रोमावलिरकुटिला केतुयष्टिः किमस्याम् ।
मत्प्रेयस्या नयनमकरौ वीक्ष्य लोलौ ग्रहीतुं
नाभीरोकादसितहरिभृद्वल्लभा गच्छतीव ॥ ६९ ॥

किं नासाद्य प्रभवति मनोज्ञं नितम्बं (थरीरथं) तं
पौष्पैरस्त्रैस्त्रिभुवनमिदं मीनकेतुर्विजेतुम् ।
अङ्गेनास्याश्चलदलदलं केनचिद्धर्त्सितं किं
भीत्या कम्प्रं कलयति तपोऽधोमुखं तज्जयाय ॥७०॥

किन्नूरुभ्यां विहसितकरः कोमलाभ्याममुष्या
व्रीळाविघ्नो द्विरदनिकरो वर्तते काननेषु ।
कालारातेर्नयनशिखिना मारितस्यात्मयोने-
र्जङ्घाद्वन्द्वं व्यतनुत विधिस्तूणयुग्मेन मञ्जु ॥७१॥

मूर्तैं रागैरिव वलयितं रोहितं पूरुषाणा-
मङ्घ्रिद्वन्द्वं जितकिसलयं भ्राजते स्निग्धमस्याः ।
सौन्दर्याद् यैर्विसकिसलयैर्निर्जितानां वधूनां
वृन्दं धात्रा गणितमकरोन्नाङ्गुलीच्छद्मना किम् ॥७२॥

चेतोजन्मप्रियसखवयःश्रीविहारैकभूमिं
कान्तामेनां गुणगणनिधिं लोचनाभ्यां निपीय ।
उन्मत्तोऽलं जगति कुरुते वल्लभायां निजायां
नित्यं स्वप्ने न हि निधुवनं तद्धिया पूरुषः कः ॥७३॥

आसाद्यारं किसलयमये तल्पमध्ये निषण्णा-
मेनां वक्तुं मधुरवचनैर्वल्लभां प्रक्रमेथाः ।
विद्धि प्रेयःसुहृदमयि मामागतं सुभ्रु! तद्वाक्-
सञ्जीविन्या विरहगरलैर्मूर्च्छितां जीवितुं त्वाम् ॥७४॥

त्वय्येतस्मिन्निति कलयति प्रेयसी राजहंस!
स्मित्वा राजद्दशननिकरच्छायशुक्लाधरोष्ठी।
अर्धोन्मीलत्कुवलयमहादामनीलैः कटाक्षैः
प्रेमस्निग्धैर्जलदमिव सा यक्षकन्या(न्वी)ति त्वाम् ॥७५॥

इत्थं भूयः प्रियसहचरीमाशु सम्भावय त्वं
वाग्भिः प्रेमप्रचुरलहरीमुद्रिताभिः खगेश!।
कल्यां माद्यद्विरहहुतभुक्कीलजालप्रताप-
प्लुष्टस्वान्तां सुमुखि! भवतीं पृच्छति प्राणनाथः ॥७६॥

आलिख्य त्वां कथमपि चलत्पाणिरुद्यानरत्न-
स्थल्यां मन्दस्मितविहसितप्रोल्लसत्कुन्दकान्तिम्।
सद्यः श्च्योतन्नयनसलिलान्यम्बरेणापनीय
द्वन्द्वेनाक्ष्णोर्न हि न बहुशो हन्त! भुङ्क्ते जनोऽयम् ॥

मां क्रन्दन्तं कथमपि खलु स्वप्नसन्दर्शितत्वत्-
कण्ठाश्लेषच्युतिपरवशं विप्रबुद्धं विलोक्य।
क्रव्यादौघो विपुलकरुणादग्धचित्तो नितान्त
हाहेत्येवं पतति सहसा मूर्च्छितो भूमिपृष्ठे ॥७८॥

अश्रान्तं त्वं कमलवदने! क्षिप्रमारोहसीयं
मत्सङ्कल्पोच्छ्रिततरपुरःस्निग्धसोपानपङ्क्तिम्।
श्वासान् क्रान्ताधरकिसलयान्मुञ्चतेऽलं जनोऽयं
दीर्घान् नित्यं मदनविशिखायत्तवृत्तिर्नितान्तम् ॥७९॥

क्रीडन् द्यूतप्रभृतिभिरहोरात्रमेष त्वया मा
  प्राङ् निद्रां यां प्रियतमवरामप्यहं नाद्रिये स्म ।
उज्जृम्भत्त्वद्विरहदहनज्वालसन्तापदग्ध-
  स्वान्तं तं मां न भृशकुपितेवेषदेषा धिनोति ॥८०॥

चेतोजन्मा मम तनुमिमां भर्त्सितात्मीयकान्ति
  कोपात् पुष्पैर्नयति तनुतां सायकैः स्वैः सुतीक्ष्णैः ।
युष्मत्सङ्गो यदि न लभते कल्मषेभ्यो महद्भ्य-
  स्तत्ताद्दृग्भ्यो न खलु हहह! त्रस्यतीषज्जनोऽयम् ॥८१॥

त्वत्सङ्गश्चेत् सुमुखि! लभते ह्रीं विहायैव गुर्वीं
  सोऽहं चेतोभवपरवशः कर्म किं नो करोमि ।
रुष्टाकाण्डे भवसि नितरामित्यहं भीतचेताः
  कुर्वे तेऽङ्घ्रिद्वितयपतित शीघ्रमात्मानमेषः ॥८२॥

क्रूरो बद्ध्वा सपदि सुदृढैरार्तिपाशैर्महद्भि-
  र्मूर्च्छागारं नयति विरहस्तादृशो मां त्वदीयैः ।
सोऽह मारज्वरकबळितो नापिबं हसवाणी-
  जीवातुं चेत् प्रणयिनि! भवेदस्य नूनं मृतिर्मे (?)॥८३॥

मद्वृत्तान्तं निगदितमिदं कृत्स्नमाकर्णयन्त्या-
  स्तस्याः स्फायद्विरहभुजगास्वादितायाः प्रियायाः ।
भूयः सद्यो हृदयविलसद्व्रापरग्रन्थिभेदं
  कुर्वी(थेत्थ?थास्तं) पतगवर! मद्वाचिकैनामुना त्वम् ॥८४॥

जात्याः पौष्पो भ्रमरतरुणेनासवोऽस्याः कदा वा
तीव्रोत्कण्ठावलयितहृदा लभ्यते जीवनीयः ।
इत्येतस्मिन् मयि कथयति हीनतास्याब्रवीस्त्वं
भृङ्गायागात् खलु न सुमना भ्राजते पुष्पितेयम् ॥ ८५ ॥

एनां भूयः कथयतु भवान् सुभ्रु! तैस्तैरुपायैः
कञ्चित्कालं गमय न भवेदीदृशी कस्य वापत् ।
कान्ते! सद्यो भवतु गळितायोगयोरेतयोर्नौ
काचिल्लक्ष्मीरिव जलधरोन्मुक्तयो रोहिणीन्द्वोः ॥ ८६ ॥

दर्शंदर्शं नयनसुभगान् भूमिभागान् समस्तान्
पायंपाय मधु सुमधुरं नूतनं वारिजानाम् ।
सम्प्राप्यारं प्रियसहचरीवासतर्यां विशाला-
मेतावावां कुरु गळितशुग्ध्यानसौ मानसौकः ॥ ८७ ॥

क्लेशग्रन्थिं गुरुमगणयन् पक्षिनाथानुकम्पा-
दिग्धस्वान्त! व्रजतु स भवान् व्योममार्गेण शीघ्रम् ।
गच्छामोऽमी सुगुरुविरहव्याकुला भूपदव्या
सान्द्रानन्दं प्रियसख! पुनः प्रेक्षणं द्राक्करोतु ॥ ८८ ॥

हंससन्देशः समाप्तः ।

॥ श्री ॥

चकोरसन्देशः । *

[पूर्वभागः]

कश्चित् कामी कुहचिदनिशं क्षत्रवीरः प्रियायां
बद्धप्रेमा तदनुसरणायासमर्थान्तरात्मा ।
स्मारंस्मारं विलसितरतान्याशये पेशलाङ्ग्या
मन्दः शोच्यामभजत दशां मन्मथाविष्टचेताः ॥ १ ॥

इत्थं नीत्वा कतिचन समाः कल्पकल्पा विकल्पै-
र्लेभे नासौ सकृदपि पुनस्तत्प्रसादस्य लेशम् ।
दुर्गस्वर्गोपवनसरसीवासिनीं कौशिकारिः
शोकादन्यत् किमुत लभते काङ्क्षमाणो मराळीम् ॥ २ ॥

कल्याणार्थी स खलु कमलागारवासस्य तावद्
गौरीभर्तुः परिसरभुवं प्राप्य वासं चकार ।
जातु ज्योत्स्नाविशदसिकतं वातपोताभिरामं
पुण्यं चूर्ण्याः पुलिनमळिभिः पूर्यमाणं प्रपेदे ॥ ३ ॥

---

* Critical'y edited from three manuscripts available in the University Manuscripts' Library.

आत्मज्योतिर्विजितजलदा देवताभिर्निषेव्या
दिक्षु ख्याता दशसु भजतां भूतिदानैकबाहुः ।
घोराकारा गुरुतररवा भद्रकालीव देवी
कुर्वाणोर्वीं विगतकलुषां या गिरीशादुदासीत् ॥ ४ ॥

स्नात्वा तस्यास्तदनु सलिले घर्मतापोपशान्त्यै
नक्तं तत्र क्षणमधिगतस्तस्थिवानस्ततापः ।
तद्वक्त्राब्जच्छवि दिवि तदा वीक्ष्य बिम्बं हिमांशो-
रुद्यत्कामोद्यममलिनधीराप चिन्तां दुरन्ताम् ॥ ५ ॥

एतस्मादप्यतिशयतरं कातराक्ष्याः कदाचिद्
द्रष्टुं स्वप्नेऽप्युत किमतनोत् पुण्यमास्यं मदास्यम् ।
निद्राहीने नियतमथवा मय्यमुष्मिन् कथं स्यात्
स्वप्नावाप्तिः क्वचन पदवी दृश्यते नो विचारे ॥ ६ ॥

कोणे स्थित्वा क्वचिदिह सदा कोकिलालापिनीं तां
काङ्क्षन्तं मां कथमिव विजानाति सा दूरसंस्था ।
योऽमुष्यै मे चरितमखिलं वेदयन्नेतदीयं
प्रीत्या मह्यं प्रदिशति स मे जीवितादप्यभीष्टः ॥ ७ ॥

ध्यायन्नेवं मुहुरत इतो विक्षिपन्नक्षि तावत्
कान्ताहीनः कमपि कमलावाहनं मोहनाङ्गम् ।
ज्योत्स्नास्वादे निरतमसकृद्वेतसीजालमध्ये
सङ्क्रीडन्तं सह दयितया सन्निकर्षे ददर्श ॥ ८ ॥

मूर्च्छामाप्तस्तदनु तदनुध्यानतोऽसौ मुहूर्तं
बुद्ध्वा भूयो भुवि निपतितश्चिन्तयामास चित्ते ।
कान्तोपेतः खगवदनिशं रन्तुमर्हन्निहमां
प्राप्यावस्थामहह! विषमां सोऽहमेवं विदूये ॥ ९ ॥

एनं तावत् किमपि कथये तर्हि नश्येद् व्यथा मे
सञ्चिन्त्यैवं परिसरमुपागम्य सन्तुष्टचेताः ।
चन्द्रालोकाक्षममतिरनाकल्पतानष्टशोभं
प्रोवाचासौ वचनमशनिप्रायकामाग्नितप्तः ॥ १० ॥

लक्ष्मीचित्तप्रियवसतये पक्षिराजाय तस्मा
लाक्षासङ्गादरुणितगरुद्भासिताशामुखाय ।
स्निग्धज्योत्स्नाग्रसनसुरणचारुचञ्चूपुटाय
स्वैरं वध्वा सह विचरते सौम्य! तुभ्यं नमोऽस्तु ॥ ११ ॥

जायापत्योरिह हि युवयोर्दर्शनं मानसे मे
निस्त्रीकस्य प्रदिशति शुचः सर्वमोदप्रदायि ।
प्रेक्ष्यात्यन्तं प्रणयविवशा(वि? व)त्युपान्ते रमन्तौ
कान्ताकान्तौ कथमिव सखे! कामिनः संसहन्ते ॥ १२ ॥

रन्तुं योग्योऽस्म्यहमपि सदा पश्य यद्वद् भवन्तौ
तं मामेव कृतवदधुना दैवमुद्वेलशोकम् ।
यावद् भूयो मयि सकुतुके दृष्टिपातं विधाता
तावन्नूनं सुखमनुभविष्यामि मुक्तो विपद्भ्यः ॥ १३ ॥

---

१. 'स्थां ह ह ह' ख. पाठः

आस्ते काचिद् वृषगिरिजुषो बालशीतांशुमौले-
बाला नित्यं निकटवसतिर्निन्दितेन्दीवराक्षी ।
यद्वक्त्रेण प्रसभमभिभूतो हि नूनं तदीये
कोटीरान्ते निवसति सदा कोमलः शीतभानुः ॥ १४ ॥

तस्यां पादप्रणतिविधये कृष्णसारेक्षणायां
पार्श्वोद्देशं पुरविजयिनः प्रत्यहं प्राप्तवत्याम् ।
चक्षुर्लक्ष्मीमियमपहरेदात्मनश्चेति भीत्या
पश्चाद्दृष्टिर्भवति भगवद्धस्तसारङ्गपोतः ॥ १५ ॥

तं चोद्देशं मदनरिपुणा रक्ष्यमाणं मनोभू-
र्यस्या रूपे प्रविशति समाश्रित्य चारुस्मितायाः ।
पूर्वद्वेषं मयि पुररिपो(स्सूनुर्नून)मेषा वचोभि-
स्तुच्छीकुर्यादिति (स हि) विचिन्त्यैव तत्से(व?वि)कायाः ॥

सम्प्राप्तायाः कुलतिलकतां नर्तकीनां क्षमाया-
मस्मान् यस्या विजयति(?) गतिश्चेति सर्वे विचार्य ।
प्रागेवास्मात् प्रतिययुरये ! स्वर्गमार्गं मराला
विद्वांसो हि प्रथममवगच्छन्ति भव्यानपायान् ॥ १७ ॥

सन्त्येवान्या भुवि युवतयः कोटिशोऽप्यस्मदीयं
चेतस्तस्या वपुरसुलभं मन्यते वासभूमिम् ।
हस्तप्राप्तान्यपि च दयितान्यञ्जसान्यानि हित्वा
दुर्गे वस्तुन्युदयति मनः साभिलाषं नराणाम् ॥ १८ ॥

चेतोयोनेर्विशिखशिखिना दह्यमानाङ्गमेनं
दीनात्मानं तदधरसुधापाननिध्या(नर्वा?निनं) माम् ।
नैवान्यासां सुखयति सखे! सङ्गमो ह्यङ्गनानां
ज्योत्स्नास्वादादपरमुत किं रोचते ते चकोर! ॥ १९ ॥

तस्याः शश्वत् कृतवसतिभिर्मन्दिरे सुन्दराङ्ग्या
मन्ये नृणां महितचरितैर्मन्दभाग्योदयस्य ।
कैश्चित् पुंभिर्भवति सुम(हत्?हा)पक्षपातैर्नलिन्यां
हंसाधीशैर्मधुपकलभस्येव रुद्धा गतिर्मे ॥ २० ॥

ग्राहैर्यूथैर्दलितवदनैः पूर्यमाणा नलिन्यः
कालव्यालैरपि परिवृता हन्त! मालेयवृक्षाः ।
केतक्यश्चाप्यतिशितमुखैः कण्टकैर्वेष्टिताङ्ग्य-
स्तत्रामित्रा ननु सुबहवो यत्र रम्यः पदार्थः ॥ २१ ॥

म(दे?न्दे) त(न्या?न्व्या) मयि नु विमुखं मानसं वानुकूलं
ज्ञात्वा तत्त्वं वदितुमिह मे विद्यते नो सखा च ।
(का?को) मे बन्धुर्भवति भुवनेऽमुष्य निष्किञ्चनस्य
द्रव्यादन्यन्न खलु सकलो वीक्षते हन्त! लोकः ॥ २२ ॥

मात्रैवास्या मनसिजरिपुः[1] प्रार्थ्यते सप्रमाणं
वित्ताधीशो भवतु दुहितुर्जीवनाथो ममेति ।
सर्वस्वं मे तव तु करयोर्जीवितेनार्पयिष्या-
म्येवं पादे पतितमपि सा नैव पश्यत्यवश्यम् ॥ २३ ॥

---

१. 'कामो' क.पाठः

भूयोऽमुष्याः प्रसरति कथं मय्यमुष्मिन् कटाक्षो
जात्या नित्यं सुरतरुमिव प्रार्थयन्त्याः शिरी(षे?षं) ।
मातुर्बाला मतमिय मये! नातियातुं समर्था
न स्वातन्त्र्यं नलिनसुदृशां चेति रूढा जनोक्तिः ॥ २४ ॥

तद्भर्तॄणामिह हि महतां विद्यते नापराध-
स्तेषु प्रीतोऽस्म्यहमयि! सदा मत्सरं न स्मरामि ।
के वा लोके कथय दयितां संत्यजेयुः परार्थे
त्वं किं कान्तां प्रदिशसि सखे! याचते वायसाय ॥ २५ ॥

तामेवान्तस्तरळनयनां चिन्तयित्वानुवार
सन्दग्धाङ्गः स्मरहुतभुजा सोऽहमेवं वसामि ।
एषा तुभ्यं खग! निगदिता प्रत्यया(त्म? न्मत्)प्रवृत्तिः
कारुण्येन ध्रुवमुपशमः कार्य एव त्वयास्याः ॥ २६ ॥

वाचालानामिह खलु नृणामव्यवस्था दुरापा
मा गाः शङ्कां कथमिव खगेनोपलभ्या मयेति ।
कश्चिद्धंसो निषधनृपतेर्दौत्यमालम्ब्य तस्मै
विज्ञायान्तर्गतमकथयद् भीमभूमीन्द्रपुत्र्याः ॥ २७ ॥

लक्ष्मीवाह! त्वयि तदधुना ह्यर्थिभावं गतोऽह
मत्सन्देशः श्रवणपुटयोः कथ्यतां कातराक्ष्याः ।
तस्याः पार्श्वं प्रति गतिरितः सर्वथा नो वृथा स्या-
च्छ्रीमानारात् स खलु भवता प्रेक्षणीयः प्रदेशः ॥ २८ ॥

संस्थाप्यैनामिह सहचरीं गच्छ तच्चारुहास-
ज्योत्स्नास्वादं समनुभवतो नागतिः स्यान्न चेत् ते ।
द्वित्राणि त्वं गमय दयिताविप्रयुक्तो दिनानि
स्मृत्वा कान्ताविरहमसकृत् संसहन्तं सखे! माम् ॥ २९ ॥

अस्मिन्नेषा वसतु सुखिनी चारुवीरुन्निकुञ्जे
न स्यान्नूनं प्रसभमितरैः पीड्यमाना वयोभिः ।
यावत् प्रत्यागमनमयि ! ते भ्रातरस्मात्प्रियाया-
स्तावत्कालं त्वहमिह भविष्याम्यमुष्याः सहायः ॥ ३० ॥

मार्गं नो चेद् गणयसि गिरा दर्शयिष्यामि स्वल-
च्छायेवायं ध्रुवमकुटिलो वीतरोधो विभाति ।
तूर्णं चूर्णीवृषशिखरिणोरन्तरालं विलङ्घ्यं
केचित् प्राहुर्मितगतिजवा योजनानां चतुष्कम् ॥ ३१ ॥

अर्थेनाह्नो भवति भवता लङ्घनीयोऽयमध्वा
विद्धि प्रत्यागतिरपि भवेन्नाम यामद्वयेन ।
एकेन स्यादपि च विपरीतेन वा दयितया ते (?)
कालेनालं खगकुलपते ! प्राय एतावतैवम् ॥ ३२ ॥

आरुह्यास्मादनिलपदवीं दृष्टिरध्युत्तराशं
प्रक्षिप्ता चेदियमिव नदी लक्ष्यते काप्युपान्ते ।
तामुत्तीर्णः सपदि घटिकामात्रमेवावधाव(न्)
द्रक्ष्यस्यग्रे गुहपुरमिति ख्यातमन्तः प्र(पेदे?देशम्) ॥ ३३ ॥

यत्रात्यर्थं वदनजनुषामन्नदानेन तुष्टिं
(गृह्णी?पुष्टी)कुर्वन् निवसति सदा पार्वतीभूः षडास्यः ।
कृत्वा पादप्रणतिमचिराद् वन्द्यमानो' जनौघै-
स्तस्य प्रीत्या मयि सकरुणो गच्छ भूयोऽप्युदीचीम् ॥ ३४ ॥

सह्यप्रस्थात् पतिमुपगतस्तत्र सेतुर्नदीनां
वञ्चीशेन स्वयमिह कृतः पञ्चशीर्षं निरो(द्धुं?द्धुम्) ।
रामेणेव प्रथममुदधौ चन्दनाद्रेः सुवेल-
प्राप्तो भूयादशमुखवधप्रार्थिना प्रेक्षणीयः ॥ ३५ ।

अस्योत्तुङ्गे परिसरगते केतुदण्डे निषण्णः
संसृष्टाङ्गः सुरभिकुसुमामोदिना मारुतेन ।
विश्रान्तः सन् धवलवटिकामुद्रिते त्वं मुहूर्तं
मन्दं भूयः कुरु मतिमतो गन्तुमाशामुदीचीम् ॥ ३६ ॥

द्वेधा भिन्ना तदनु पदवी लक्ष्यते तत्परं ते
किञ्चिद्वक्रा भवति परमा शीघ्रगम्या तदन्या ।
मौर्वीबाणासनलतिकयोरन्तरं विद्धि यद्वद्
यां वा काञ्चिद् व्रज भुजगभुग्यद्वदाशंसितं ते ॥ ३७ ॥

सेव्याध्वानं सुरुचिरगते! संश्रयन् यद्यगच्छो
मध्ये मध्ये पुरसरिदरण्यानि सन्त्युत्तमानि ।
तान्यन्यस्मिन्नकुटिलतरे सानुबद्धानि न स्युः
सर्वत्रैवं सह विवसतो नाम दुःखं सुखं च ॥ ३८ ॥

१. 'नो जनौ' ख. पाठः

लक्षीकुर्वन् दिशमथ दृशोराशुगत्याशु गत्वा
तस्माद् देशादपि च दशकं नाडिकानां तदानीम् ।
आरान्मेरोः शिखरवदधो ज्योतिषा दुर्निरीक्षं
प्रेक्षेथास्त्वं कनकरचितं प्रोन्नतं सोमसूत्रम् ॥ ३९ ॥

क्षेत्रं तावत् पतग ! भवता प्रे(क्ष?क्ष्य)ते प्रागधस्तात्
पात्रं ल(क्ष्याः?क्ष्म्याः) प्रतिहतविपत्सङ्गमं सङ्गमाख्यम् ।
यत्र स्थित्वा किल कलिमले मग्नमेतत् समस्तं
प्रत्युद्धृत्य त्रिजगदवति प्रत्यहं दैत्यहन्ता ॥ ४० ॥

ब्रह्मघ्नो वा बहुतररुजापीड्यमानो जळो वा
स्नात्वा तीर्थे विमलसलिले यत्र दुष्टाशयो वा ।
सद्यः पूतो भवति हि जनः सर्वपङ्काद्विमुक्तो
जम्बूनद्यास्तटगतमयः स्वर्णतामेति यद्वत् ॥ ४१ ॥

यत्रासङ्ख्याः परभृतगिरः पत्रिकाभिर्मुखाब्जं
प्रच्छाद्यैव स्रजमनुदिनं विद्धि बध्नाति पद्मैः ।
आलोक्य स्वामनुपमतमामाननाम्भोजशोभां
मा भूदेषां मनसि महती भीरितीव स्मरन्त्यः ॥ ४२ ॥

पक्षद्वय्या पतग ! नभसो भूमिभागेऽवतीर्णो
नत्वा देवं नरकजयिनं नाट्यरङ्गं प्रविष्टः ।
मत्प्रेयस्याः प्रियतम उपाविश्य तस्मिन् मुहूर्तं
मार्गश्रान्तिं शमयतु भवान् मध्यभागे दिनस्य ॥ ४३ ॥

कान्ताकारा लिखितवपुषस्तत्र दृष्ट्वा चकोरीः
कान्ताशङ्की भवतु न भवानातपान्धीकृताक्षः।
अह्नायास्मादपगतपरिश्रान्तिरुत्पत्य भूयो
गच्छोदीचीं प्रथमपदवीमध्वगैर्वन्द्यमानः ॥ ४४ ॥

पश्चात् कुर्वन् पुरगिरिवनान्यम्बरान्तेन गच्छ-
न्नच्छं तावत् प्रविश सरितो नन्दिनीनामपत्यम्। (?)
निःशेषाघप्रशमनपयःसङ्गनष्टाशुभानां
तत्रस्थानां सफलय दृशस्त्वं चकोरेक्षणानाम् ॥ ४५ ॥

तामुत्तीर्य त्रिदशतटिनीं राजहंसो यथा त्वं
गत्वा मार्गं पुनरपि जवादेव यामार्धमात्रम्।
आराद् गौरीमखिलजगतामादिभूतामधस्ता-
द्वामापाङ्गीं वलयनिलयाधीश्वरीमाश्रयेथाः ॥ ४६ ॥

प्रेक्ष्यं तस्मात् प्रणतपरितापापहारिप्रकाशं
प्रत्यासन्नं पुरुवनपतेर्मन्दिरं मन्दराभम्।
यन्निर्माणादलभत वरं कौरवक्षेत्रकर्ता
ताव(त्यः?दृयः) प्राक् स्वयमिव यशः शैलपाथोधिनाथः ॥

तत्र स्थाणुं त्रिभुवनगुरुं संस्थितं सम्प्रणम्य
प्राकाराग्रे विहितवसतिर्विश्रमस्व (?) क्षणं त्वम्।
उत्पत्य द्यामुपवनगरुत्पाटवो नाडिकान्ते
मन्दोष्णेषु द्युमणिकिरणेष्वश्रमं गच्छ भूयः ॥ ४८ ॥

तस्योपान्ते पुनरपि सरः सन्तरन् पक्षतिभ्यां
 दृष्ट्वा सस्यैः सकुतुकमनाः पूर्यमाणान् प्रदेशान् ।
क्षेत्राण्यूर्ध्वान्यपि च भवनान्यञ्जसा लङ्घयित्वा
 द्रक्ष्यन्नग्रे वृषशिखरिणं प्राग्वदेव प्रयाहि ॥ ४९ ।

दूरात्तावन्नयनपदवीं नूनमापत्स्यते ते
 देशः कश्चिन्नयनसुभगः सर्वतेजोनिधानम् ।
-...प्रतिपदमुपालक्ष्यमाणोऽप्युपान्ते
 प्रायो भूयात् पतग! भवता यामपादेन गम्यः ॥ ५० ॥

इति पूर्वभागः ।

अथ उत्तरभागः ।

त्रीण्यत्यर्थं त्रिभुवनपुराणानि तान्युज्ज्वलानि
 प्रत्यक्षाणि प्रशमिततमोजालकान्यद्भुतानि ।
बिम्बानीव व्यपगतमलान्यर्कचन्द्रानलानां
 संलक्ष्यन्ते तदनु भवता सोमसूत्राण्यमुत्र ॥ १ ॥

(वक्र?पङ्क्ति)स्तावत् तव नयनयोर्दूरतो गोपुराणा-
 माविर्भूयादरुणसहजस्येव देवेन्द्रपुर्याम् ।
गत्वा या तु त्रिदशवसतेर्मेरुशैलस्य शृङ्गा-
 ण्यभ्रच्छन्नान्यधारितवती भाति भास्वत्प्रकाशान् ॥ २ ॥

अत्युत्तुङ्गं त्रिपुरमथितुर्नित्यवासैकदेशं
वृत्राराातिप्रमुखविबुधैः सेव्यमानं विशालम् ।
वप्रेणावेष्टितमभित एवाप्रतर्क्यप्रभावं
क्षेत्रं रूप्यक्षितिधरमिव प्रेक्ष्य भूयः कृतार्थः ॥ ३ ॥

हृत्वा मग्नं सलिलनिलये केरळं भूसुरेभ्यो
दत्त्वा तांस्तानपि च विविधान् स्थापयन् धर्मसेतून् ।
क्षेत्राण्यन्यानपि च बहुशः सम्प्रतिष्ठाप्य तस्मिन्
क्षत्रारण्यावलिहुतवहो यत्र रामस्तिरोभूत् ॥ ४ ॥

अन्तर्धानस्थलमनुदिनं वन्द्यमानं जनौघै-
रेतस्याद्याप्ययि ! भुजभुवो नाभिगच्छन्ति यस्मिन् ।
येषां वंश्या नृगकुरुहरिश्चन्द्रचन्द्राङ्गदाद्याः
प्रायो लोकान् प्रथममजयन् सासुरान् सामरांश्च ॥ ५ ॥

उर्वीदेवाः कृतवसतयः कुर्वते केरळीया
यस्मिन् वेदाध्ययनमनिशं चोदिता भार्गवेण ।
नो विघ्नन्ते ननु निवसतामापदो यत्र नृणां
यद्वा मातृक्षितिपयशसां भाजनं व्याहरन्ति ॥ ६ ॥

तस्यादूरे भुवनमहिता दीर्घिका दिव्यतोया
मत्प्रेयस्याः स्नपनविधिना श्लाघनीया विभाति ।
तत्रस्थानां तदनु वयसां कूजितं तावकीनं
श्रोत्रद्वन्द्वं प्रविशति सखे ! तावदव्यक्तवर्णम् ॥ ७ ॥

तस्यास्तीरे विगतकलुषं विद्यते क्षेत्रमेकं
तत्राधस्तादवतरतरां मार्गखेदं विनेष्यन् ।
आगच्छेयुर्दिनपरिणतावङ्गसंक्षालनार्थं
तावत् सर्वास्तरळनयनास्तत्प्रदेशे वसन्त्यः ॥ ८ ॥

तासामेका सदृशवपुषामन्तरे सुन्दरीणां
निःसाम्याङ्गी परिलसति चेक्राकिनीनां शचीव ।
तां तन्वङ्गीमतनुजघनां विद्युदाळीसवर्णा-
मर्णोजाक्षीमयि! मम सखे! जीवनाथामवेहि ॥ ९ ॥

नापश्यश्चेच्चटुलनयनां शान्तमार्गश्रम(स्तु? स्त्वं)
तस्मादाशु प्रथमकथितं क्षेत्रमेव प्रयाहि ।
नीलग्रीवं नियतवसतिं तत्र गत्वा यथावत्
काले पश्चात् पतग! पदवीं द्रष्टुमस्या यतस्व ॥ १० ॥

कञ्चित्कालं पुनरचरमे तोरणे सन्निविष्टः
प्राच्यामेव प्रहि(श?णु) नयने पक्ष्मळाक्षीं दिदृक्षुः ।
अप्राप्ते चाप्युदयमुडुपे काप्यभिख्या तदानीं
नेत्रद्वन्द्वं शिशिरयति ते नूनमर्काभितप्तम् ॥ ११ ॥

अन्विष्यन्नप्यतिकुतुकवानाशु तत्कारणं त्वं
नन्वीक्षेथाः पुररिपुपदं प्रोद्यतायाः प्रणन्तुम् ।
मत्प्रेयस्या निजनिलयतः प्रस्थिताया दिनान्ते
निःसादृश्यं वदनकमलं निन्दितेन्दुप्रकाशम् ॥ १२ ॥

आस्वाद्यास्मादधरितसुधां चन्द्रिका(न्त्यं? न्ति) गलन्तीं
मन्दं मन्दं शमय महतीं क्षुत्तृडार्तिं तदानीम् ।
तस्यां भूयः परिसरभुवं प्राप्तवत्यां मदुक्ति-
र्मिथ्या मेति व्यवसितमतेरक्षि ते सार्थकं स्यात् ॥ १३ ॥

संस्थातव्यं सुखद ! भवता सम्यगत्रैव यावत्
प्रत्यावृत्तिः पितृपतिरिपोर्मन्दिरात् सुन्दराङ्ग्याः ।
तां गच्छन्तीं तदनु भवनं मन्दमेवानुगच्छन्
स्निग्धच्छायद्रुमसुविहितं निष्कुटं संश्रयेथाः ॥ १४ ॥

तास्मिन् नित्यं कृतवसतिभिः सङ्गतस्त्वं चकोरैः
श्रुत्वा तेभ्यो निवस चरितं साधु चारुस्मितायाः ।
सायं प्रत्यागमनमचिरात् प्रेक्ष्यते तस्य नूनं
सा यं प्रत्युद्व्रजति सुमुखी वल्लभं वामहस्ता ॥ १५ ॥

तस्मिन्नन्तर्गतवति पुनर्मन्दिरान्तं प्रविष्टो
गूढाकारः सुरतपुरतः कुट्टिमे सन्निविष्टः ।
स्वैरालापांस्तदनु च तयोः सन्निशम्याशये मे
मोघत्वं वा किमु सफलतां वाञ्छितस्यावगच्छ ॥ १६ ॥

सङ्क्रीडन्त्यामपि सुमतिना कामुकेन प्रियाया-
मस्मद्वाक्यं न खलु भवता वाच्यमेतद् विहङ्ग ! ।
स्वामेवारादितरचरिताकर्णने श्रद्दधानां
कान्तां दृष्ट्वा कथय भुवने कस्य न स्यादसूया ॥ १७ ॥

नीडस्थायास्तदनु निकटं शारिकायाः प्रविष्ट-
स्तस्यै मन्दं मनसि निहितं वेदयैतत् समस्तम् ।
मत्सन्देशाद् ध्रुवमुपगतं मानदाया भवन्तं
सैवामुष्याः श्रवणयुगलं प्रापयिष्यत्यकाण्डे ॥ १८ ॥

तर्हि प्रायो निशमय सदैवा च गम्ये भवेतां
शान्तिर्वृत्तिर्विहग! भ(व? वि)ता मन्मनोदुःखवह्नेः ।
नैवागच्छेत्तत्र तु पुरतो नानुकूला यदि स्या-
न्नूनं दद्यादवसरमसावेव वक्तुं न चेत् ते(?) ॥ १९ ॥

पूर्वं[1] प्रोक्तं परिसरवनं सम्प्रविष्टोऽथ यस्मिन्
वृक्षे तास्मिन्नपि च निवसन् कान्तया विप्रयुक्तम् ।
सोष्णश्वासं मुहुरपि रसन्मामनुध्यायमान-
स्तत्रस्थानां निशि भव सखा चक्रवाकावलीनाम् ॥ २० ॥

तस्मादस्मिन् गतवति पुनः प्रेयसि प्रेयसीं मे
सन्द्रक्ष्यंस्तां पुरपरिसरं सम्प्रविश्य प्रभाते ।
द्वारोपान्ते विहितवसतिर्व्यक्तवर्णं महात्मन्!
मन्दं मन्दं कथयतु भवान् मङ्गलं स्यात् तवेति ॥ २१ ॥

मन्नामाङ्कं मधुररणितं सन्निशम्य त्वदीयं
जालद्वारे निहितवदना (वी?द्र)क्ष्यति त्वां मृगाक्षी ।
गण्डे तावन्मुकुरसदृशे स्वाननं वीक्ष्य तस्या
मा कुर्वस्मिन्नितरपतगाशङ्कया तुण्डपातम् ॥ २२ ॥

---

१. 'पूर्वप्रोक्तं' ख. पाठः

मत्पार्श्वात् त्वामुपगतमुपाकर्ण्य सन्तुष्टचेताः
  प्रत्यासन्ना श्रुतिसकुतुकापृच्छते मत्प्रवृत्तिम् ।
पुंसामेव स्वयमनुदिनं काङ्क्षतामन्तरङ्गे
  नार्या वार्तानिशमनविधौ विस्मयः स्यान्न कस्याः ॥ २३ ॥

ऊर्ध्वं यायाः खगपरिवृढेत्युक्तवत्याश्च तस्याः
  पक्षद्वय्या वपुरनुपमं मार्जयन् मन्दमन्दम् ।
मत्सन्देशं मनसि निहितं त्वन्मुखे दत्तकर्णां
  वक्तुं भूयो मधुरवचनं तामथोपक्रमेथाः ॥ २४ ॥

आर्ये ! कार्यं वचनमिह मे कर्णयोः सादरं ते
  तस्योपान्ते कृपणवचनैरागतं मामवेहि ।
त्वद्वैमुख्यादनितरगतिर्हन्यमानो मनोभू-
  बाणैः क्षीणद्युतिरतितरां दूयते यो दयार्हः ॥ २५ ॥

दृष्ट्वा तस्य व्यसनममितं पक्षिणोऽपि प्रकामं
  कारुण्यं मे भवति सुमहन्मानसे मन्दबुद्धेः ।
सर्वज्ञायास्तव न सुतनो ! कातरं सानुकम्पा
  तस्मिन् नासीत् कथमिव मतिस्त्वद्वियोगाभितप्ते ॥ २६ ॥

त्वामेवैकां मनसि निभृतं ध्यायमानो मनोज्ञे
  चूर्णीतीरे प्रतिवसति स प्रत्यहं प्रेमखिन्नः ।
वार्तां विज्ञापयितुमयि ! ते तेन सम्प्रेषितोऽहं
  तत्सन्देशं निशमय मया कथ्यते कातराक्षि ! ॥ २७ ॥

प्रेमात्यर्थं प्रणयिनि! पुरा पूर्वसन्दर्शने नौ
यत् संजातं त्वयि मनसि मे ह्येधते तत् क्रमेण ।
मत्संयोगोत्सुकमतिरसौ दीन इत्यन्तरङ्गे
वात्सल्यं ते वरतनु! कथं विद्यते नैकदापि ॥ २८ ॥

यत् ते चित्ते कथय निहितं तत्त्वतश्चेति कष्टं
पृष्टापि त्वं मुहुरकथयो नेङ्गितं मे कदाचित् ।
यावद्यावद् विधुमुखि! मया पृच्छ्यमाना पुरासी-
स्तावत्तावन्निगदितवती तत्तदित्येव दूये ॥ २९ ॥

आकृष्टेयं तव गुणगणैर्मामकीना मतिः प्रा-
गप्यन्यासामभिलषति किं सङ्गमं सुन्दरीणाम् ।
हित्वा कान्तां कनकसरसीं व्योमगा राजहंसी
किं वा काङ्क्षेदितरनळिनीमल्पसारां रसज्ञा ॥ ३० ॥

मत्वैव त्वां मनसि दयितां वर्तमानस्य यत्तत्
त्वत्संयोगं मम विजहतो जन्म मोघीकरोषि ।
नैतन्नूनं शृणु समुचितं कर्म ते कम्रवक्त्रे!
प्रायोऽपि स्यादनिशमशुभायैव दैवेऽनुकूले ॥ ३२ ॥

निःसौन्दर्यस्त्वनवगतशास्त्रोऽतिदूरे निवासी
निःस्वो बालः कथमिव भवेदेष विश्वासयोग्यः ।
मा भूदेवं मतिमति! मुधा मानसे ते विषादो
नाथेऽनाथे कुरु मयि कृपां नास्म्यहं शङ्कनीयः ॥ ३२ ॥

दास्यं मातुस्तव किमथवा प्रेयसां वा सखीनां
यद्यत् प्रोक्तं प्रणयिनि! सदैवाचराम्यस्ततन्द्रम् ।
पादद्वन्द्वं शरणमुपयातस्य पाथोजनेत्रे!
त्वद्दासस्य स्मरहतमतेस्त्वामृते का गतिर्मे ।। ३३।

चन्द्रश्चायं शिशिरपवनः पुष्पवल्लयश्च भृङ्गा-
स्त्वत्संयोगे परमसुहृदः सम्भवेयुः प्रिये! मे ।
तैरेवाहं विदयमधुना द्वेष्यभावेन पीड्ये
भू(याः?यः) सर्वे [1]विपदुपगमे हन्त! मित्राण्यमित्राः ।।

या मे तन्वि! त्वमिव शरणं विद्यते यामिनीषु
त्वय्यौत्सुक्यं मनसि मम सा बन्धमेतद् विदित्वा ।
निद्राप्याराद् व्रजति कुपितेवापहाय प्रिये! मां
प्रेक्ष्यान्यस्यां प्रणयविवशं का प्रियं संसहेत ।। ३५ ।।

स्यात् त्वद्रूपस्मरणविधिषु स्मेरवक्त्रे! सुखं मे
तापो भूयादपि च करुणाभावचिन्तासु तद्वत् ।
त्वद्ध्यानं मे भवति हि सुखायापि दुःखाय चैवं
कान्ते! कर्म त्रिदिवनरकावाप्तिकारीव जन्तोः ।। ३६ ।।

दुष्प्रापत्वादिह खलु नृणां क्षत्रवीरप्रियत्वा-
द्वैयात्याद्वा बहुधवतया व्यङ्ग्यभङ्ग्या च कीर्त्या ।
काङ्क्षन्ती चेदपि च नयनैरुर्वशीतुल्यभावं
मा मा मुग्धे! नयतु भवती दौर्मदीयामवस्थाम् (?) ।। ३७ ।।

---

१. 'विपदपगमे' ख. पाठः

शय्याशायी शशिमुखि! मुदा शारदीषु क्षपासु
श्रान्त्या दीर्घश्वसनमिलनात्पतदन्तच्छदायाम्।
सम्भोगान्ते मदुरसि सुखं सम्पतन्त्यां भवत्या-
मालीनाक्षि त्वदधरसुधामापिबेयं कदानु ॥ ३८ ॥

केलीकालेष्वलसविलसल्लोचनाम्भोरुहाया
नृत्यद्वक्षोरुहयुगलिकां विश्लथत्केशपाशाम् ।
प्रोद्यत्स्वेदप्रकरसुभगां प्रेमगर्भोक्तिभेदां
प्रेक्षिष्ये ते प्रणयिनि! कृशामङ्गवल्लीं कदानु ॥ ३९ ॥

वक्षोभागे वरतनु! शुचां मन्दिरे मामकीने
वृद्धस्नेहं करकिसलयं विक्षिपन्त्या भवत्याः ।
हस्तेनोद्यत्पुलकममुनैवाब्जकोशाभिरामं
मुग्धे! मन्दं मृदु कुचयुगं मर्दयेयं कदानु ॥ ४० ॥

इत्थम्भावीन्यनिशमसितप्रेक्षणे! तानि तानि
स्मृत्वा स्मृत्वा मम निवसतो ह्यत्र चित्ते सुखानि ।
अज्ञातान्तःस्मरपरिभवं याति कालः कथञ्चित्
कोकस्येव प्रियसहचरीविप्रयुक्तस्य रात्रिः ॥ ४१ ॥

सक्रीडन्तीं तदितरजने निःस्पृहत्वात् प्रियैस्त्वां
सम्प्रेक्ष्याहं सह सहितुमप्यक्षमोऽस्मि क्षणं यत् ।
नागच्छामि त्वयि सकुतुकस्तेन कान्ते! त्वदन्तं
बूह्यालोहं कमितुरितरासङ्गिनं किं सहेथाः (?) ॥ ४२ ॥

त्वद्वैमुख्यान्मृतिमुपगतं मां समाकर्णयन्त्याः
सम्प्रीतिस्ते मनसि महती सम्भवेच्चेद्यशश्च ।
भूयादेवं निधनमधुना सोऽहमेष्यामि नूनं
भूयः किं वा भवतु दयिते! श्रेयसे तत्परं मे ॥ ४३ ॥

दुःखैरेवं तव विरहजैर्दुःसहैरेव कालं
नीत्वान्यस्मिन् जनुषि भवतीसङ्गमं सम्प्रपत्स्ये ।
जन्तोरन्तर्गतमसुलभं जन्मनीहेतरस्मिन्
सार्थं भूयाद् भव इति भवेदागमोक्तिर्न मिथ्या ॥ ४४ ॥

इत्यादीनि प्रकट(य) मम प्रार्थितानि प्रियाया
इत्युक्तोऽहं तव च तरुणि! प्रोक्तवानस्मि सर्वम् ।
प्रत्याख्याहि द्रुतमिति भवत्युक्तवत्याशु तस्याः
क्रान्तं भूयान्ननु करुणया मानसं मानदायाः ॥ ४५ ॥

वामापाङ्गा निगदितवती वाचमप्यन्यथैव
भूयास्त्वं मे भवतु सकृदप्याशयस्य प्रसादः ।
देशानिष्टान् सह दयितया सञ्चरन्मस्मदीय-
प्राणत्राणप्रभवसुकृतं प्राप्य कामं रमस्व ॥ ४६ ॥

ग्रन्थान्ते दृश्यमानमिदं पद्यं लेखककृतमिति प्रतिभाति--

'मासे वृषे पुष्यगते शशाङ्के खे मध्यगेऽहस्कृति चान्द्रवारे ।
समालिखन्नीलगलाख्यविप्रश्चकोरसन्देशमिदं मनोज्ञम् ॥'

श्री

॥ मारुतसन्देशः ॥

आनन्दाब्धौ सह दयितया कोऽपि खेलन् विलासी
हर्म्ये रम्ये सुरभिसमये मन्मथाज्ञानुवर्ती ।
ईर्ष्यावेगादिव कुचतटात् तूर्णमाकृष्य तस्या
निन्ये दूरं कनककटकं नाम शैलं नियत्या ॥ १ ॥

तत्पूर्वं तं झटिति विरहं कान्तया सम्प्रयाति-
स्तस्मिन् वासन्तिकतरुवृते सञ्चरन्नद्रिशृङ्गे ।
भूयस्तासौ कवलितधृतिश्चिन्तया क्लान्तचेता
मन्दं वान्तं मलयमरुतं चैत्रमित्रं ददर्श ॥ २ ॥

मञ्जुध्वानैर्मधुपपटलीवन्दिवृन्दैः परीतं
पुष्यन्मल्लीस्तबकविलसच्चामरैर्वीज्यमानम् ।
स्पृश्यं रूपं सुरभि दधतं चूतरेणुप्रपञ्चै-
रङ्गान्यम्भोरुहमधुकणैः साधु निर्वापयन्तम् ॥ ३ ॥

आमन्दान्दोलितकिसलयव्रातरक्ताम्बरान्तं
भान्तं कान्तानखपदनिभैः कौङ्कुमैः केसरौघैः ।
तं वीक्ष्यासौ मदनसचिवं विप्रयोगातुरत्वाद्
बद्धोत्कम्पो विगलितधृतिस्तास्थिवानात्तमोहः ॥ ४ ॥

वैधुर्यं तद् बलवदवधीर्याथ धैर्यावलम्बी
स्वं वृत्तान्तं सपदि दयितां तेन सम्बोधयिष्यन् ।
तस्याभ्याशं सविनयमुपागम्य नम्रोत्तमाङ्गो
वाणीमेवं प्रणयतरलां सादरं व्याजहार ॥ ५ ॥

प्राज्ञे मूढे बलिनि बलहीने चरे स्थावरे वा
दक्षे मन्दे सति नसति वा रूपवत्यप्यरूपे ।
नव्यं विश्वं प्रकटितवतां कामुकानां कवीनां
चासौ प्रायो भवति हि गिरां निर्विशेषा प्रवृत्तिः ॥ ६ ॥

वार्ता कच्चित् सुभग! भवतो विद्यते मातरिश्वन्!
चैत्राबद्धः प्रणयगरिमा कच्चिदास्ते तथैव ।
धत्ते वृत्तिं किमु भवति सम्भावना मान्मथी सा
कच्चित् सानोरयमभिगमः साम्प्रतं चन्दनाद्रेः ॥ ७ ॥

श्रीखण्डाद्रिर्भुवनमहितो हन्त! ते जन्मभूमि-
र्मेरुः क्रीडागिरिरथ जलक्रीडितं देवसिन्धौ ।
लीलोद्यानं दिविचरवधूलालिता कल्पवाटी
मानोच्छेदः प्रणयिषु चकोरीदृशां चाधिकारः ॥ ८ ॥

शर्वोत्तंसीकृतसुरधुनीशीकरा हारयष्टिः
सान्द्रैर्गात्रं सुरभितमलं वैजयन्तीपरागैः ।
इच्छामार्गानुसरनिपुणा वल्लभा चाञ्जना सा
चित्रं चित्रं जयति भुवने तावकी भाग्यलक्ष्मीः ॥ ९ ॥

त्वय्यभ्याशं गतवति सखे ! साम्प्रतं दैवयोगात्
चित्तं मत्कं विरहविधुरं हन्त ! निर्वाणमेति ।
किञ्चाकाण्डे ह ह ह ! नितरां जातविस्रम्भयोगं
मामर्थित्वं भवति विषये विश्वबन्धो नियुङ्क्ते ॥ १० ॥

स्वप्रासादे विहृतिविरतौ वल्लभालिङ्गितोऽहं
सुप्तः श्रान्त्या सुखमिह हहा ! शैलसानावबुद्धये ।
बुद्धश्चावैक्षिषि दयितया शून्यमात्मानमारा-
दातिष्ठन्तं कमपि पुरुषं चाञ्चितं दिव्यचिह्नैः ॥ ११ ॥

आख्यच्चासावथ हतदशावाप्तिपर्याकुलं मां
सौम्यातङ्कं त्यज निशमयैतां च तथ्यां गिरं मे ।
हेतोः कस्याप्यहरमहमेवात्मगेहाद् भवन्तं
तत्त्वं हेतोर्मम च नचिरादेव वक्तास्म्यहं त्वाम् ॥ १२ ॥

गन्तव्या नो वसतिरमुतो मन्नियोगं विना ते
कार्यात्रैव स्थितिरपि सखे ! यावदेष्याम्यहं त्वाम् ।
तुभ्यं भद्रं भवतु कृतिने मात्र ते द्वापरो भू-
दित्याभाष्य त्रिदिववसतिर्मां दिवं चोत्पपात ॥ १३ ॥

एवं तस्मिन् गतवति विषं कर्मणा हन्त ! वाचा
पीयूषं च प्रचुरमभिवृ(ष्ट्या? ष्या)शु लोकं सुराणाम् ।
हेतुं तथ्यं परममवधिं चाविजानन् विपत्ते-
रत्रैकाकी विधुरविधुरं निःश्वसन् बंभ्रमीमि ॥ १४ ॥

तत् त्वा याचे सततग ! विपन्नस्य मे हन्त ! कान्ता-
मासाद्याश्वासय लघु निवेद्येदृशीं मत्प्रवृत्तिम् ।
शून्ये दूरप्रवसनमरौ सीदतां घोरतापे
यूनां छत्रं भवति दयितोदन्तलाभो हि लोके ॥ १५ ॥

दोष्णोर्मध्ये मम नवमृणालीमृदून्यङ्गकानि
क्षिप्त्वा खेदान्निधुवनभुवो वल्लभा या प्र(वर्तीसुप्ता) ।
स्वापस्यान्ते हुतवहमयं सा दरादू वैपरीत्यं
वीक्ष्याकाण्डे कथमिव सखे ! प्राणिति प्राणनाथा ॥ १६ ॥

लोकानां यः सततममृतवर्षुको वारिवाहो
दूतं कान्तां प्रति कृतवता(क्षोद्रितं हि)यक्षेण पन्थाः ।
क्षुण्णो नान्यैरहमपि समाश्रित्य तं कामतस्त्वां
मत्प्राणार्थं निखिलजगतां प्राणदं प्रेरयामि ॥ १७ ॥

यत्रायत्तं खलु सुशकुनं देहिनां कार्ययोगं
तस्येदानीं तव यदि शुभं प्रार्थनीयं निमित्तम् ।
तत्किं छिन्नं विरणय गिरां देवताया विपञ्चीं
दिव्यां भेरीं ध्वनय धम(तश्चोऽयस्त्वो)च्चकैः पाञ्चजन्यम् ॥

यातव्या ते पुनरिह पुरी कामदत्ताभिधाना
सौदत्तानां भुवनविदिता वासभूमिर्नृपाणाम् ।
यस्यां प्रीत्या हिमगिरिसुतापूर्णवामाङ्गभागो
नित्यं देवस्त्रिपुरविजयी विश्वनन्दाख्ययास्ते ॥ १९ ॥

देवोद्यानद्रुमसुमनसां सौर(भि?भा)श्शोभनीयं
त्वामायान्तं पृषतमधिरुह्याङ्गजानीकमुख्यम् ।
मार्गे मार्गे मधुपतरुणा मञ्जुकूजत्कलत्राः
सेविष्यन्ते विततगरुदाकम्रपिञ्छातपत्राः ॥ २० ॥

मल्लीहासैः पिकरुतिगिरा निर्गलत्पुष्पमाध्वी-
हर्षास्रैश्च त्वदुपगमजं व्यञ्जयन्तं प्रमोदम् ।
सम्भाव्यैनं प्रणयिनमदस्सौहृदस्यानुरूपैः
संश्लेषाद्यैरचलमचिरादारभेथाः प्रयातुम् ॥ २१ ॥

सप्तस्कन्धी सरणिरुचिताप्यादधीतेति मन्ये
यात्रामान्द्यं तव जिगमिषोः कर्तुमापन्नरक्षाम् ।
पश्यैतस्याश्चिरविरहवधूत्सुकानाहवान्दीन् ?
दृष्ट्वा बन्धून् कथमिव सखे! सौम्य! सद्यःप्रयायाः ॥ २२ ॥

तद् भौमी ते भवतु सरणिस्तां च नित्याभियोगा-
देवस्त्रीणां निधुवनपरिश्रान्तिविश्रान्तिकृत्ये ।
नो वेत्सि त्वं ध्रुवमिह गृहं तत् प्रियायाः प्रयातुं
मार्गं मत्तः शृणु बहुगुणं नूतनं वीतदोषम् ॥ २३ ॥

श्वः प्रत्यूषे दिशमिळिबिळापत्यदोर्दण्डगुप्तां
लक्ष्यीकृत्य प्रियसख! मुदा प्रस्थितस्याग्रतस्ते ।
वीचीदोष्णा कमलचषके संदधाना मधूलीं
यास्यत्यक्ष्णोर्विषयमचिरान्निम्नगा निम्नतोया ॥ २४ ॥

आशासाना तव कलरुतैः सारसैः सुप्रयाते
या दाक्षिण्यं भजति तटिनी मोदमुद्वेलयन्ती ।
तां सामोदप्रसृमररसां कल्पयन्नात्मना त्वं
दाक्षिण्यं तत्(फलिनयसफलय) निजं गन्धवाहातिमात्रम् ॥

प्राच्योदीच्यां तटभुवि वनं रम्यकं नाम तस्या
आतन्वानैः परभृतरुतैर्मञ्जुलैः सुप्रलापम् ।
चूतैर्नूतप्रसवरजसामुत्किरैः शाखिकाग्रै-
रादत्तासे पदमनु वितीर्णानि संवाहनानि ॥ २६ ॥

प्रेमोत्कर्षागतनिजसुहृद्वर्गसंमानहेतो-
र्मन्दीभूते पथि पथि मृगे तत्र वाह तवास्मिन् ।
दाक्षिण्यं मा त्यज लघु परित्रातुमिच्छन् ममासून्
बन्धुस्नेहः खलु जनिमतां जातिभेदानपेक्षः ॥ २७ ॥

कृत्वा कान्तां वनवसुमतीं दूरतः पुष्पितां तां
क्षेत्रं सस्यैरथ बहुविधैरास्तृतं पाकनम्रैः ।
तेभ्यो रुन्धन्नतियतनवानत्तुमिच्छुं स्ववाहं
तीर्त्वा वेगात् प्रविश पुरतो यज्वनामग्रहारम् ॥ २८ ॥

त्वामायान्तं सहचरमृते यज्ञियस्येक्षमाणा
सा विप्राणां वसतिरभितो यूपरोमाश्वभेदैः ।
धूमव्रातश्लथकचभरैश्चापि नीरन्ध्रिताशै-
राविष्कुर्यात् त्वदुपगमजातुत्सवोल्लासनाङ्कान् ॥ २९ ॥

ग्रामे तस्मिन् निपुणमतिभिर्यज्वभिः कर्मदक्षैः
प्रीत्या नित्यं कुतुकनिभृतैर्लालितत्वान्नितान्तम् ।
अङ्गैरङ्गीकृतनिजगुणैरञ्चितानां श्रुतीनां
लावण्यश्रीर्मुदमतितरां दास्यते पश्यतस्ते ॥ ३० ॥

मन्दं वीजन् क्रतुहुतभुजस्त्वं धवित्रीकृतात्मा
धूमव्रातं बहिरपनुदन्नक्षिविक्षोभहेतुम् ।
आयासोत्थानलमपनयन् ब्रह्मणां ब्रह्मबिन्दू-
नूरीकुर्याः सुरवर ! सतां तत्र संश्लाघितानि ॥ ३२ ॥

आविभ्राणः सुकृतविभवं सज्जनासेवनोत्थं
त्यक्त्वा तूर्णं पदमथ सखे ! तत्प्रणाय्यैः परीतम् ।
दस्यूच्छित्त्यै कलितवपुषो गोदु(हां।हः) केशिहन्तुः
क्षेत्रं याया भुवनविदितं देवकान्तारनाम्ना ॥ ३२ ॥

तस्मिन्नध्यक्षय कुवलयश्यामलं कोमलाङ्घ्रिं
शिञ्जानाभिः कलितजघनं किङ्किणीमालिकाभिः ।
बर्हापीडं करतलसमासक्तहैय्यङ्गवीनं
गोपस्त्रीणां कुचसुचरितस्याङ्कुरं नन्दसूनुम् ॥ ३३ ॥

पादानत्या मधुरनुतिभिर्वीजितैश्चात्मगात्रे
लब्धासे त्वं पवन! न तथा पात्रतां तत्प्रसक्तेः।
काल्यां कल्यां मृदुलवलनैश्चुल्लिकोद्धारमद्धा
शीतीकुर्वन् कृतमुख! यथा पायसीं तां विलेपीम् ॥ ३४ ॥

ब्रूमश्च त्वां पवन! भवनाभ्यन्तरे तत्र कार्षी-
मा संस्थानं वलयितगतिः कौतुकात् त्वं चिराय ।
गोपीसूनुः शिशुरयमभिज्ञातवात्यावलेप-
क्लेशस्त्रस्येत् कथमिव न ते वीक्ष्य तादृक् स्वरूपम् ॥ ३५॥

किञ्चारण्यं शुचिमपि पपौ यः पुरा ते सखायं
तस्याभ्याशे स्थितिरपि चिरं ते न पथ्येति मन्ये ।
तीक्ष्णात् तीक्ष्णं झटिति कबलीकुर्वता धूमकेतुं
किं दुष्पानः प्रकृतिशिशिरस्तेन मन्दागमस्त्वम् ॥ ३६॥

निर्गम्यास्मादथ हरि(वदीपदा)दोघवद्देवसिन्धोः
सन्तापघ्नः सकलजगतां प्रान्तरं द्राक् प्रतीर्य ।
प्राप्तो योगं पथि मधुकरैरूर्मिभिर्यामुनैर्वा
प्राचीमाशां द्रुतमभिसरन्नाव्रजेः पूर्वसिन्धुम् ॥ ३७॥

लक्ष्मीवक्त्राम्बुजपरिमलं चोरयन्नुद्धतात्मा
संगृह्णानो नवरसवतीं वैजयन्तीवधूळीम् ।
त्वामायान्तं परमसु(कृ?ह) सैन्यग्रो गन्धवाहः
प्रत्युद्गन्ता सपदि कमलाकान्तशय्यानिशान्तात् ॥ ३८॥

शीतच्छाये पुलिनतळिमे वेष्टमानं नितान्तं
वातैः शूत्कारिणमसहनत्वादिवौर्वाग्निजूर्तैः ।
कल्यं कर्तुं मलयजरसैस्तं पयोधिं यतेथाः
स्यादापन्ने प्रतिविधिरिह श्रेयसे हि स्वलभ्या ॥ ३९॥

तापिञ्छानोकहतलजुषां स्वैर(मम्मा? तो सा)नुपीणां
ताम्यन्तीनां मनसिजरणायासतः सानुकानाम् ।
वायोरन्यत् त्वचि लवणतः शीतलस्पर्शसौख्यं
कुर्वन्नुच्चैर्निधिपतिदिशं याहि रोधस्तलेन ॥ ४० ॥

एलावल्लीपरिमिलनतो बिभ्रदामोदभारं
चुम्बन्नम्भोरुहसुरभिलान्यापगानां मुखानि ।
धुन्वन् वन्याः किसलयकदम्बावृतीः कामचारी
यायाः प्रीत्या पुरमथ सखे ! तुङ्गकच्छाभिधानम् ॥ ४१ ॥

अम्भोराशेरधिलहरि यन् बिम्बितत्वाद् विभूत्या
भात्युद्युक्तं दिव इवन्मले सद्मनो निर्जयाय(?) ।
किंचामर्षाद् ध्वजवटपत्राणि धुन्वन् विजेतुं
तां माहेन्द्रीं दिवमिव समल्पीत्सु संदृश्यते च ? ॥ ४२ ॥

कान्तोत्सङ्गे सरसमुषिता मञ्चशृङ्गेषु यस्मिन्
वीक्ष्याम्भोधेः पयसि च तथैवात्मबिम्बानि नार्यः ।
कुप्यन्त्युच्चैस्तरलमनसः स्वाभ्य एवान्यबुद्ध्या
रागोद्रेके तमसि पततां कास्तु तत्त्वावबोधः ॥ ४३ ॥

राज्ञा गुप्तं किल मणिमता तत्पुरं पौरवेण
प्राज्यामोदं मधुसख ! विधायाशु निर्गत्य तस्मात् ।
तस्याभ्यर्णे व्रज कमलिकां वल्लभामम्बुराशे-
रङ्कादद्रेस्तपनशिरसः प्रस्थितां भर्तृपार्श्वम् ॥ ४४ ॥

यस्याः श्रुत्वा तरळकलहंसीतुलाकोटिनादं
प्रीत्याम्भोधिर्मुहुरपि तरङ्गोच्छ्रयस्यापदेशात् ।
उत्थायोच्चैर्विगळितधृतिः पश्यतीवाभियानं
तोयासौधस्थगितशफरीलोलनेत्रप्रचारैः ॥ ४५ ॥

ताटस्थ्यं त्वद्गतिहतिकृतां क्ष्माभृतां पातुरब्धेः
सन्त्यज्याशां (चर) कमलिकावर्त्म(नोदय!नाद्य) प्रतीचीम् ।
रम्याभोगां धनदवसतेः प्रातिवेश्यां नितान्तं
यां गोपायन्नधिवसति ते बान्धवो गन्धवाहः ॥ ४६ ॥

उत्सर्पद्भिर्मलयजरसस्यन्दगन्धैर्नितान्तं
शीतैर्मुक्ताफलपरिचयात् ताम्रवर्णीकणैश्च ।
उत्प्रेक्ष्यारात् त्वदभिसरणे मातरिश्वा स देवः
शङ्के मन्दाम्बुधिमपरमुद्वेलयेदात्मनो(तिं!तम्) ॥ ४७॥

कामापूर्त्यै पुनरवसरस्तस्य दिक्पालमौलेः
प्रत्यावृत्ताविति मम मतं सौम्य! कारुण्यसिन्धो! ।
आर्तत्राणाभिधमनवरोप्याहितं कार्यभारं
(स्वादु!साधु)त्वं किं व्रजति महतां पश्य कामप्रचा(रा:!रः) ॥

तद् गच्छेस्तं तपनशिरसं यो महेन्द्रास्त्रभीत्या
स्वस्मिन् न्यस्तं मणिगणमवाक् क्षारसिन्धोः प्रयातैः ।
शैलैर्मूर्ध्ना हरिपदतलं संश्रितो रक्षतीव
श्रेयोऽन्येषां परमपि समाश्रित्य कुर्वन्ति तुङ्गाः ॥ ४९ ॥

आबिभ्राणा रुचिमनुकलं प्रौढिमानं दधाना-
श्छायां लोलां प्रतितरुतलं सन्निवेश्यावसन्नाम् ।
अह्नो नाथः श्रयति गगनस्यावलग्नं यदासौ
काले तस्मिन्नचलशिखरं यास्यसि त्वं च तुङ्गम् ॥ ५० ॥

यः सम्प्राप्तो दिशि निजतनूजस्य सौम्यस्वभावः
संसेव्यत्वं निखिलजगतां द्वादशात्मा तनोति ।
सोऽयं मृत्युञ्जयसखदिशं प्राप्य तीक्ष्णप्रतापो
नो यात्यालोकितुमपि सखे! तादृशं ह्युत्तरत्वम् ॥ ५१ ॥

संसर्गोत्था जगति गुणदोषा विशेषेण ते ते
तस्मात्तूर्णं परिहर सखे! संस्थितिं तस्य पार्श्वे ।
नो चेत् तत्सन्निधिपरिचयात्तूर्ण(मूर्मौ)र्वायमाणो
निर्वाणाय प्रभवसि कथं नाम मद्वल्लभायाः ॥ ५२ ॥

गत्वा तस्मादचलशिखरादुत्तरास्मिन् दिगन्ते
गौरीसूनोर्निलयनमथो याहि मायूरकुञ्जम् ।
तस्य प्रीत्यै शिखिनमनिशं नर्तयद्भिर्ध्वजस्थं
कालाम्भोदैरिव परिवृतं सान्द्रपत्रैस्तमालैः ॥ ५३ ॥

दोष्णा शक्तिं बहिरबहिरप्यादधानं धरन्त
पित्रोः षण्णां पृथगिव दृशां प्रीतये षण्मुखानि ।
कृत्यं केतोः पितुरपि निजं नीलकण्ठेऽर्पयन्तं
तस्मिन् निर्वर्णय समुदयं तेजसां तारकारिम् ॥ ५४ ॥

त्वामायान्तं निजपितृसखं पावकिर्वीक्ष्य हर्षा-
 दुत्फुल्लानां भृशमथ दृशां द्वादशानां प्रभाभिः ।
सध्रीचीभिः सुरपतिसरित्स्रोतसो वाटिकाया-
 स्तस्याः कर्ता विकचकुसुमोल्लासिनीं लोध्रलक्ष्मीम् ॥ ५५ ॥

मा सेनान्यं क्षितिधरभि(तोऽदं) मन्यथा स्मान्यथा तं
 यातोऽस्म्यद्रेरिति सुभगता सौम्य! सर्वङ्कषा ते ।
झञ्झावाते धृतमुदयमित्यभ्यसूयां च कार्षी-
 र्मा तद्वाहे शिखिनि वशगा ह्यर्थमैत्री नियत्या ॥ ५६ ॥

वन्द्यं वन्दे तव चरणयोर्द्वन्द्वमद्वन्द्वहेतोः
 स्कन्देत्यस्मै विरचितनुतिस्तं नमस्कृत्य देवम् ।
निर्गम्यास्मादचलतटिनीकाननान्याशु तीर्त्वा
 गाहस्वेच्छागमन! नगरीं नागकाञ्चीं मनोज्ञाम् ॥ ५७ ॥

भूतिं गेहं निजमिव नयन्नोजसा वैरभाजा-
 मार्तिं मौर्वीमिव रिपुकुलं प्रापयन् दोर्बलेन ।
भिन्दन् भास्वानिव समुदयं शार्वराणां प्रतापै-
 र्भूपालो यां भुवनविजयी भूतिवर्मा भुनक्ति ॥ ५८ ॥

तस्यां सायाहनि चलदृशां डोळया पुष्पवाट्यां
 खेलन्तीनां सह सहचरैर्विद्धया तत्कराग्रैः ।
मध्ये मध्ये यदि तरळयेर्वाससी नो प्रतीमो
 यूनां दास्य(त्याऽस्य)यि बत! दृशामुत्सवं त्वं कियन्तम् ॥ ५९ ॥

क्रीडद्गौडीकुचतटपरीरम्भशुम्भत्तरङ्गां
गन्धोदाख्यां सरितमवगाह्याथ तामुत्तरेण ।
दूराल्लक्ष्यं ध्वजचलपटैर्गोपुराग्रावनद्धै-
र्नीत्यानन्दं दनुसुतरिपोः क्षेत्रमध्यक्षयेथाः ॥ ६० ॥

शय्याभोगीश्वरकबळनादन्यवातैस्त्वसद्भि-
र्मन्ये शून्यं भुजगशयनस्यास्पदं तन्नभस्वन् ! ।
तत् त्वद्व्याप्तिर्मलयज ! भृशं प्रीतये स्यान्मुरारे-
र्गोशीर्षाद्राबुपकृतिपरं त्वां तु नाद्यादहीशः ॥ ६१ ॥

तत्रावान्तं मधुसखमपि त्वां प्रहर्षेण नूनं
(मि? मै)त्रीं कर्ता स्वयमपि मधोर्निग्रहन्ता स देवः ।
त्यक्त्वा वैरं निजमपि मिथो मित्रतां स्वानशक्त्या
ते जीयांसो दधति हि सखे! किं पुनर्नाम जन्यम् ॥ ६२ ॥

दुग्धाम्भोधेर्गरुडपततस्तालवृन्ताच्च ल(क्ष्याः?क्ष्म्याः)
वाहोद्धूतादमृतशिशिरान्निर्गता वातपोताः ।
यन्निर्वाणं ददति भवते तं विधातुं किमीशे
मन्दात्माहं तदिह विदधे केवलं ते नमस्याम् ॥ ६३ ॥

इत्थं नत्वा नरकमथनं तस्य हर्षोत्तरङ्गा-
माज्ञादृष्टिं सपदि परिगृह्याथ तद्वल्लभायाः ।
मज्जन् मन्दस्मितमधुझरे(रे? शे)षमामन्त्र्य शेषं
मार्गं तूर्णं गमय निचितं ना(च? ग)लोकैः समन्तात् ॥

निक्षिप्यान्तं मधुकरमयं शल्यमम्भोजिनीनां
 रागाक्रान्तस्तनुमतितरां दर्शनीयां दधानः ।
सन्ध्याकान्तिच्छुरितघनकाश्मीरजन्माङ्गरागां
 मन्ये याता सपदि ककुभं वारुणीं पद्मबन्धुः ॥ ६५ ॥

अर्यम्ण्यन्तर्दधति दयिते मीलदम्भोरुहाक्षी
 तप्तेनोच्चैः कुचकलशवच्चक्रयुग्मेन युक्ता ।
मत्कान्ताया हतविधिकृतां दुर्दशां स्मारयन्ती
 भूयो भूयस्त्वरयति पुरा पद्मिनी त्वां तदानीम् ॥ ६६ ॥

सस्यक्षेत्रे फलभरनते शाखिवृन्दे लतानां
 गेहे पुष्पस्तबकनिचिते चत्वरे ग्रामभागे ।
आपूर्यान्तर्बहिरपि परिष्यन्दमानं प्रवाहं
 लक्ष्मीसिन्धोरवतर दृशा कामदत्तानगर्याः ॥ ६७ ॥

प्रत्युद्यातः कुवलयदृशां वर्णकामोदभाजा
 वल्लीमालामधुकणभृता तत्र सन्ध्यानिलेन ।
शृण्वन्नुच्चैर्नटनपिशुनं विश्वनन्दस्य शङ्खं
 सान्द्रानन्दं प्रविश नगरीं मत्प्रियावासभूताम् ॥ ६८ ॥

इति पूर्वसन्देशः ।

[उत्तरभागः ।]

लक्ष्मीवाद्भिर्मदनसुमनःकाण्डकर्मान्तगेहैः
केलीहर्म्यैः सुमसुरभिलैः सम्पदामार्तवीनाम् ।
तृष्णोत्ताम्यन्मधुक(र)मधुस्यन्दपानप्रपाभिः
पुष्परामैस्तव वितरिता मोदमुच्चैः पुरी सा ॥ १ ॥

शम्भोरक्ष्णा दहनवपुषा मन्मथं दग्धदेहं
तस्यैवाक्ष्णो दिवसकरतामागतस्य प्रसादात् ।
सम्पन्नाङ्गं प्रथयितुमिवोपाश्रितैस्तस्य पादा-
नम्भोजैर्या विलसति पुरी पुण्यतोयावगाढैः ॥ २ ॥

कामोच्छ्राया नवनवसुधायोगसम्पन्नरूपाः
सन्तन्वानाः कुलशिखरिणो भङ्गमुच्चैर्गतस्य ।
आदित्यासेवितपरिसराश्चित्रलेखापरीता
यस्यां सौधा हरिपदमवस्कन्द्य दूरं विभान्ति ॥ ३ ॥

कामः कामातुर इव कदाचिन्न मुञ्चत्यालिन्दं
लीला लीलायितुमिव सुखं सर्वदा सन्निधत्ते ।
भोगो भोगेच्छुवदनिशमिच्छानुकूलोऽस्ति यस्यां
रूपं रूपेप्सुवदलमुपास्ते(ङ्क? ङ्ग)कान्यङ्गनानाम् ॥ ४ ॥

यस्यां वक्त्रैर्विधुरपजितो योषितां तानि जेतुं
तुल्यावस्थैः सह सरसिजैश्चिन्तयन्नभ्युपायम् ।
नक्तं वापीरिव परिगतो वीक्ष्यते बिम्बलक्षाद्
यान्त्यन्यस्मात् सति परिभवे मित्रतां वैरिणो हि ॥ ५ ॥

सायं मल्लीपरिचयकषायैः (करैः) शीतशीतैः
निःसीमानं रुचिमुपगतेनेन्दुना स्पृश्यमानाः ।
क्षान्त्वा घोरं दिवसमखिलं पादघातं खरांशो-
र्यत्रोच्छ्वासं दधति नितरामिन्दुकान्ता निशासु ॥ ६ ॥

सम्फुल्लाम्भोरुहमुखगलद्भृङ्गझङ्कारगीतैः
सान्त्वं सान्त्वं विमलपयसा स्वादुना तर्पयन्त्या ।
श्लिष्यद्वीचीभुजलतिकया वेगवत्या तटिन्या
मात्रा मोदादिव निजतटोत्सङ्गमारोपिता या ॥ ७ ॥

खेलन्तीनां कुवलयदृशां मञ्चशङ्केषु रात्रौ
यत्रोपान्ते मनसिजविलासास्पदान्यासनानि ।
वीक्ष्यानङ्गं दधदिव परीतापमिन्दुर्नितान्तं
बिम्बव्याजाल्लुठति परितः शीतमुक्तास्थलीषु ॥ ८ ॥

यस्यां सौधाः सुरपथलिहो वासरं सर्वमारा-
दर्कस्योग्रैः किरणनिकरैस्तापितत्वात्तृषेव ।
रात्रौ रात्रौ पवनचलितैर्वैजयन्तीरसज्ञा-
प्रान्तैर्बिम्बं शिशिरकिरणस्यानुवेलं लिहन्ति ॥ ९ ॥

पादानिन्दोः शबलवपुषो निर्गतान् जालरन्ध्रै-
रन्तर्गेहं प्रणयिषु भृशं कोपवैमुख्यभाजः ।
दृष्ट्वा मानग्रहविहतये मन्मथेन प्रयुक्ता
मत्वा शक्तीः सपदि दयिता यत्र दूरं त्रसन्ति ॥ १० ॥

योगं याता इव जलरुहैः कामिनीवक्त्रपङ्क्तौ
प्राप्ता राहोर्मुखमिव महानीलवातायनेषु ।
बद्धोद्योगा इव तिमिरनिष्कासने दीपजाले
संदृश्यन्ते दिविचरपते! यत्र भानोः प्रतापाः ॥ ११ ॥

स्वप्रत्यक्षं कुसुमधनुषो दाहमद्रीन्द्रपुत्र्या
न क्षाम्यन्त्याः प्रबलमपमानं निराकर्तुमन्तः ।
सृष्टाः कामा इव परिसरे शम्भुनार्धेन पत्न्या
कान्तिं नव्यां परमुपगता भान्ति यस्यां युवानः ॥ १२ ॥

विस्रम्भापादनचतुरया रञ्जयन्नात्मवृत्त्या
कुर्वन्नुच्चैः सुरभिमवदातैः स्वकीयैर्यशोभिः ।
नित्यावेक्षादृढतरगुणैरङ्ककैर्लोभनीयां
यामैक्ष्वाको नरपरिवृढो मित्रवर्मानुभुङ्क्ते ॥ १३ ॥

कोटीराग्रश्लथशशिकलोल्लासिधम्मिल्लभारं
भ्रश्यद्वेणीभरवलनशैवालितोत्तंसगङ्गम् ।
कन्दर्पोद्दीपकशिखिशिखोद्योतविद्योतिताङ्गं
(नि? ना)र्युद्गीतामृतलहरिकास्फालनाव्यक्तहासम् ॥ १४ ॥

उत्कूलोदित्वरबहळशृङ्गारनिर्वाणवीर्यं
रौद्रं कुर्वन् निजमिति रसं नाममात्रावशेषम् ।
नृत्यन् नित्यं दिवसविरतौ शम्भुरर्धाङ्गजानि-
र्नो जाने यान्नयति कियतीं भाग्यलक्ष्मीमिहेति ॥ १५ ॥

तामासाद्य प्रियसख ! पुरीं वेगावत्यास्तटिन्या-
स्तत्रोन्निद्रैः सुरभि कमलैः सम्यगाचम्य तोयम् ।
पूर्वं क्षेत्रं विषमनयनस्याभियायाः समन्ता-
न्नृत्तारम्भप्रहतमुरवध्वानहृष्यज्जनौघम् ॥ १६ ॥

अभ्रच्छेदैर्विरचय विभोर्नृत्यतस्तत्र साध्यै-
श्चित्रैरूर्ध्वं क्षणरुचिगुणस्यूतपार्श्वैर्वितानम् ।
प्रागाघ्रातैर्मलयजरसस्यन्दगन्धैश्च रङ्गं
तं कुर्वीथाः प्रचुरम(द)झङ्कारिभृङ्गावलीकम् ॥ १७ ॥

गूढं सन्तं निटिलनयने विश्वसंहारहेतो-
रन्ते तं ते सहचरमसन्धुक्षयन्नाश्रयाशम् ।
बद्धस्रस्तं घनकचभरं स्विन्नगण्डावलम्बं
मन्दं प्रोत्साराय सुरपते ! सौम्य ! शैलात्मजायाः ॥१८॥

चूडाताराकमितरि भृशं दीप्यमानेऽपि गौर्याः
स्मेरेऽप्यास्याम्बुरुहि स विभोर्नृत्तरङ्गः समन्तात् ।
मत्प्रेयस्या विरहतमसा वक्रचन्द्रे निगीर्णे
नूनं सम्प्रत्ययति नितरामन्धतामन्धकारैः ॥ १९ ॥

हारं नृत्तोत्सवमिति समासेव्य तस्यावसाने
वारेणालङ्कृतिफणभृतां तृष्ण(जा? या) पीतशेषः ।
द्वारोदीच्या गिरिशभवनान्निर्गतो नातिदूरे
(रंवा?गेहं) (सान्नि?नि)र्वर्णय मम परां भूतिमु(न्मू? न्मी-
लयन्तम् ॥ २० ॥

बाह्यद्वारं मरतकमणीखण्डबद्धावतारं
जाज्वल्येते सततमभितो यत्र रत्नप्रदीपौ ।
पौष्पं चापं शरमपि दधाच्चित्तयोनेः सजाने-
श्चारूत्कीर्णं विलसति तथा रत्नबिम्बद्वयं च ॥ २१ ॥

यष्ट्या केतोः कुसुमधनुषो मीनमङ्कं दधत्या
दूराद् दृश्यं (नयनसुभगं) गोपुरं तत् समेत्य ।
अन्तर्गच्छेर्भवनमरुताभ्युद्गतो हन्त! कान्ता-
सन्ध्यासंलेपनपरिमलालाभशोच्येन मन्दम् ॥ २२ ॥

संबिभ्राणा रुचिमतितरां सन्नतिं चोपयाताः
स्निग्धाः क्लिष्ट्वा स्वयमपि यथाभागमन्ते वसन्तः ।
हृद्योदर्का गिर इव गुरोर्माधुरीं मत्प्रियायाः
संगृह्णन्तः प्रियसख ! भृशं भान्ति यत्रेक्षुकाण्डाः ॥ २३ ॥

काले काले मधुरपयसा भूतिभिर्भूयसीभिः
सम्यग् धात्र्यां सुतवदभिनिक्षिप्य संवर्ध्यमानाः ।
प्रेयस्या मे पृथुलवपुषः शालयस्तत्र मन्ये
शोचन्त्यारान्नमितशिरसस्तां वियुक्तां मयाद्य ॥ २४ ॥

तुङ्गाः केरक्रमुकनिकरा योजिता नागवल्ल्या
तन्व्या तस्मिन्नुपचितरसं लालिता दोहळेन ।
खिन्नास्तस्या विरहदशया वर्तनीं मे समन्ता-
दुद्वीक्षन्ते मुहुरिव समुन्नाम्य दूरं शिरांसि ॥ २५ ॥

कूपः कोणे मनसिजरिपोस्तत्र माहेन्द्रनीलै-
र्बद्धो रम्भादलविततिभिर्वारितार्कप्रतापः ।
मन्ये सम्प्रत्ययमपि विहन्तुं न तापं समर्थो
गाढं तापं दधदिव दशामीदृशीं वीक्ष्य तस्याः ॥ २६ ॥

वापी दृश्या विदिशि निर्ऋतेर्विप्रयोगार्तिभाजा
तन्व्या दत्तं प्रतिवितरितुं हन्त! भूयोऽपि काले ।
फेने हासं वदनसुषमां पङ्कजे भ्रूविलासं
भङ्गे हंसे गतिमपि विनिक्षिप्य या रक्षतीव ॥ २७ ॥

संबिभ्राणा नवकिसलयव्रातभारं समन्ता-
दर्कस्योग्रं किरणनिकरं दूरमुत्सारयन्ती ।
वल्लीकुञ्जे मधुशिशिरितान् बध्नती वातपोतान्
वृन्तोन्मुक्तैर्मृदुलकुसुमैरास्तृणाना धरित्रीम् ॥ २८ ॥

मध्येमध्ये तरळकुररीकूजितार्तप्रलापा
धूळीधूम्रा बहलतरुणाशोकबद्धान्धकारा ।
सज्जा तस्या दिनमनु वयस्येव शीतोपचारे
दृश्या तस्यास्तटभुवि सखे ! वृक्षवाटी च तत्र ॥ २९ ॥

तस्या मध्ये कुरबकतरुर्मत्प्रियाश्लेषलाभाद्
धन्यम्मन्यो हहह ! हतधीः कुड्मलैस्तर्जयन् माम् ।
मानोत्तुङ्गः कथमयमवर्तिष्ट नो विस्मरामः
सोऽपीदानीमहमिव सखे ! वञ्चितो हन्त ! धात्रा ॥ ३० ॥

रक्ताशोकः शतमघशिलाकुट्टिमस्थोऽस्ति तस्या-
मारादू दत्तं मम दयितया दोहलं प्राप्य हृष्यन् ।
अर्धोद्भिन्नं कुसुमनिकरं सोऽपि सन्तापशाली
मन्ये रुन्धे किसलयपुटच्छद्मना पाणिनाद्य ॥ ३१ ॥

यस्यादत्ते कुसुममुरसा धार्यमाणा मया सा
कालेकाले सदयमिह सम्भाव्य मन्दं करेण ।
चूतः सोऽयं मम विरहतः सत्कृतिं तामविन्दन्
दुःखी पुष्प्येत् किमु किमथवा पुष्प्यतामद्य केन ॥ ३२ ॥

तस्यासन्नो बकुलविटपी वृत्तसम्पन्नरूपो
यस्तन्वङ्ग्या वदनमदिरासत्क्रियां लोभनीयाम् ।
धत्ते मौलौ विकचकुसुमामोदलक्षेण नित्यं
शङ्के तस्मिन्नपि सुवदना नाधुना सादरेति ॥ ३३ ॥

तेषां मध्ये कनकलतिकामण्डपो भूरुहाणां
स्थूलैर्मुक्ताफलसमुदयैरन्तरा बद्धवेदिः ।
यत्रासीना विरचितकचा सा सुखं मत्कराभ्यां
स्नाता सायाह्नि शशिमुखी सेवते मन्दवातान् ॥ ३४ ॥

तत्रान्यस्मिन् प्रियसख ! शुभे भूविभागे समिन्धे
रत्नस्तम्भप्रकरविधृतस्फाटिकारोहरम्यः ।
राजन्नीत्रः कनकफलकै रूप्यखण्डावबद्धो
मत्प्रासादः श्रियमुपगतः पद्मरागैर्गवाक्षैः ॥ ३५ ॥

बिभ्रच्छूलं जटिलितशिरा रत्नपादैः सभूतिः
तेजोन्तस्थं बहिरवकिरन्नूर्ध्ववातायनाक्ष्णा।
कृत्वोत्सङ्गे प्रियविरहितां तामिव त्रातुकामो
यः कन्दर्पं समनुकृतिभिर्भाययत्युग्रमूर्तेः ॥ ३६ ॥

काप्यातङ्काद् यदपि न चिरावस्थितिः साम्प्रतं सा
तस्मिन् नक्तं तदपि भवितव्यं तया सन्निधात्र्या ।
हित्वा वाहं तदथ कलितोपानहौ पादपद्मौ
कुर्वन् देवप्रवर ! मणिसौधं (त)मारोह तुङ्गम् ॥ ३७॥

आकर्षन्तः सततमुदितान् स्वेदबिन्दून् विदूरा-
दुष्णांस्तापं मदनजनितं स्वामिवोद्बोधयन्तः ।
प्रत्युद्याता भवनकुहरात् सङ्कशः श्वासवाता-
स्तत्रस्थां तां सुरवर ! तदा सूचयेयुस्तवाग्रे ॥ ३८ ॥

द्वारावस्थायिनमविरतं बाणसन्धानमोक्ष-
व्यासक्तं ते विभुमगणयन्नेव कामं मदान्धम् ।
अन्तर्धाय व्रज च शनकैरन्तरीशेन धात्रा
शोच्यां कांचिज्झटिति गमितां धिग्दशां दारुणेन ॥३९॥

वीक्षेथास्तां वरतनुमसंस्कारतो धूसराङ्गीं
क्षामक्षामां सदृशवपुषां तत्र मध्ये सखीनाम् ।
प्राच्यक्षोणीधरशबरदीपप्रभाकज्जलाग्रै-
र्लीढां तारागणपरिवृतां चन्द्रलेखामिवाद्याम् ॥ ४० ॥

सुञ्जाना सा सुसदृशवयोरूपलावण्यभासां
तत्राळीनां सदसि भवता पश्यता तत्पुरोऽपि।
कामं लोके सुरवर! गुणा(स्सा।ऽस्सा)भ्यमन्ये भजन्तां
जागर्त्यें(कः।कः)पुनरनुपमो जातिशंसी हि धर्मः ॥ ४१ ॥

मध्ये मध्ये चलधृति विरुन्धानमुद्धूय बाल्यं
गाढोत्तिसक्तः प्रथमरसयोगेन कन्दर्पबन्धुः।
उद्यद्रागप्रकृतिरधुना सुस्थिराङ्गो वराङ्ग्या
गात्रे सम्राजति तरुणिमा भोगवृद्धिं दधानः ॥ ४२ ॥

यः प्रादुष्षत्तममलिनिमा लाळनेनातिवक्रो
यश्च स्नेहं प्रकटितवतोऽन्तरं यो न दत्ते।
कल्याणी तं कचभरमहो मूर्ध्नि धत्तेऽनिशं सा
किं नो मान्यो जगति सुमनःसङ्गसौरभ्यशाली ॥ ४३ ॥

सस्नेहं यानुचितसमये मर्दितुं चारुनेत्रं
संयन्तुं चाप्यहमधिकृतः पुष्पदाम्ना नताङ्ग्याः।
हन्ताकाण्डे मयि विरहिते स्थानविश्लेषलोलान्
को वान्यस्तानहमिव सखे! लालयत्यद्य बालान् ॥ ४४ ॥

नीचा नीचैर्गतिमनुकलं साश्रता दर्शयन्तो
ह्री वक्रत्वं फलमनु दृगुद्वजकाः पोषकस्य।
धैर्यं कर्तुं निखिलजगतां कुञ्चिकाश्चित्तयोनेः
ये ते नेयाः किमिति कुरळा नो शिरश्छेदमस्याः ॥ ४५ ॥

वृत्ते दाहे मदनवपुषो बाहुनाळेन सर्वं
सारं कृष्ट्वा झटिति धनुषि प्लुष्टमध्ये समुष्टि ।
तत्खण्डाभ्यामतनुत विधिस्तद्भ्रुवौ निर्विकल्पं
ते कुर्वाते कथमितरथात्मैकनिघ्नां त्रिलोकीम् ॥ ४६ ॥

ये मानोत्थे तदनु मदनोत्थे च तस्याः पुरस्ता-
*दुद्विज्ञाते कलहसमये मां परं लक्षयन्त्यौ ।
मध्ये भङ्गं क्वचिदपि गते हन्त ! तान्ते भ्रुवौ ते
कुत्रान्यस्मिन् मधुरमधुना दर्शयेते स्वलास्यम् ॥ ४७ ॥

जित्वा नीलोत्पलशफरवृन्दानि सौन्दर्यभूत्या
प्रापय्यामुज्जगमपि रुषा तानि भग्नैर्विधेयम् ।
तन्नामान्तर्निदधदपि जेतुं समं श्रोत्रजातं
तत् स्वाभ्यर्णं व्रजदिव पुरो भाति तन्नेत्रयुग्मम् (?)॥४८॥

यान्त्यापाङ्गं चलधृति यया सौम्य ! दृष्ट्याहमुक्तो
भावोन्मुख्यं कुवलयदृशस्तत्र साहाय्यकारी ।
क्वासां तस्या न पदमभवं प्रेमसम्भावनाना-
मद्यास्रौघैर्बत ! मम कृते हन्यते सापि मुग्धा ॥ ४९ ॥

लक्ष्म्याः सत्या वदनकमले तौ कपोलात्मदर्शौ
संशोध्येते श्रुतिकिसलयैस्ताम्रहस्तैस्तथास्याः ।
तत्रोदञ्चत्प्रतिकृतिवशाद् द्वित्वमापद्यमानो
द्वैधं मोदप्रसरमनुभुङ्क्ते यथा चुम्बनेषु ॥ ५० ॥

---

* आत्मनेपदं चिन्त्यम् ।

रागं स्थाण्वाश्रमकिसलयेष्वीशधैर्यं विजेतुं
सन्तेने यं सुरभिसमयो नापि तत्रापचक्रे ।
यत्नोपात्तं फलयितुमथंच्छिद्य तं विश्वधैर्यं
कान्ताकान्ताधरकिसलये योजयामास नूनम् ॥ ५१ ॥

तस्या वक्त्रे निखिलजगदानन्दधुर्ये चकास-
त्येणाङ्कं यो व्यधित स विधिर्देव! वृद्धोऽपि बालः ।
कृत्वान्तर्धिं क्वचन जलदे क्वापि सूर्ये निमज्ज-
न्नम्भोराशौ स तु हिमकरः साधु बालोऽपि वृद्धः ॥ ५२ ॥

रज्यद्दण्डं मम निधुवने चुम्बनावृत्तियोगा-
न्मध्ये दन्तक्षतितिलकितोष्ठं मदारूढरागम् ।
वक्त्रं तस्या मनसि लिखितं मे तदद्याथवालं
कर्तुं शक्तो विधिरपदयस्तन्न वक्तुं बताहम् ॥ ५३ ॥

कण्ठः कुण्ठीकृतजलजशोभाप्ररोहो नताङ्ग्याः
साटोपानां मम दशनलीलायितानां विसोढा ।
आस्ताम्भोधिं निजपथमसौ प्राणयात्रां निरोद्धुं
नूनं चण्डश्वसिततरळं साम्प्रतं संतनोति ॥ ५४ ॥

रूपं तस्या भुजलतिकयोश्चित्रमीशे न वक्तुं
याभ्यां त्रस्तं कनकलतिकाशाखिकापारिजातम् ।
आरूढाङ्गं सह मृदुपदैरात्मजातैः प्रवालैः
कम्प्रैर्नूनं म्रदिमगुरुणा तच्छयेनाभिभूतैः ॥ ५५ ॥

मानिन्या मां मुहुरपि रुषा सापराधं विहन्तुं
खिद्येते यौ निबिडधृतया मल्लिकानां स्रजापि ।
गण्डोपघ्नौ करकिसलयौ तौ भृशोष्णाश्रुपातै-
रत्यातप्तौ कथमिव सखे! कर्कशौ नो भवेताम् ॥५६॥

दोर्भ्यामालिङ्गितुमतिदृढं यावदेवाभियुङ्क्ते
तावत्कालात्ययमसहमानं नु वक्षोजयुग्मम् ।
पूर्वं नीरन्ध्रयति भुजयोरन्तरालं स्वयं द्राक्
तारुण्येन प्रतिकलमलं वर्धमानं वराङ्ग्याः ।५७॥

एतावन्तं समयमतियत्नेन तिग्माश्रुपाताद्
रक्षित्वा तावुरसिजकिशोरौ नवोद्भेदकान्तौ ।
उष्णोष्णानां नयनपयसामद्य धाराप्रपातै-
र्हा हा! रात्रिन्दिवमतितरां दूरसंस्थस्तपामि ॥५८॥

गाढासक्तावुरसिजरथाङ्गाह्वयौ सर्वकालं
तस्या दृष्ट्वा बहुलरजनी रोमरेखाच्छलेन ।
भीता ताम्राधरनवरवेस्तद्वियोगाय मन्ये
मध्यं संरोहति गुरुतमा मोहयन्ती जगन्ति ॥५९॥

दुर्दर्शाधस्तलमुदयिनां पूर्णलावण्यवारां
सिन्धौ मध्ये वहति सुतनोर्नाभिरावर्तलीलाम् ।
धत्ते चैतत् पुळिनसुषमां पार्श्वतः श्रोणिचक्रं
चक्रश्रेण्याः कनकरशना यत्र शोभां बिभर्ति ॥६०॥

सारङ्गाक्ष्या विपुलजघनाभोगसौन्दर्यलक्ष्म्या
नूनं वापीपुळिनसुषमा द्वन्द्वयुद्धे व्यजायि ।
लज्जागौरं जलमयनिचोळावृताङ्गं यदेत-
न्मध्ये मध्ये क्वचन कियदुन्नाम्य रूपं समास्ते ॥ ६१ ॥

लीलाया मे चरितमसकृद् दृष्टिचार्यं निगूढं
लज्जागोपायितमुचितमेकास्पदं चित्तयोनेः ।
अस्याः काञ्चीपदमलघु धुर्येण शून्यं मया तत्
कष्टं क्लिष्टावृति विधुरतां भूयसीमद्य धत्ते ॥ ६२ ॥

रम्भाकुम्भीश्वरकरमणिस्तम्भसौभाग्यडम्भ-
स्तम्भाभिज्ञौ किमपि सुभगम्भावुकौ मे नखानाम् ।
साटोपानां मनसिजरणक्रीडितैरूरुकाण्डा-
वालम्बेते बत! शिथिलतां पाण्डुतां चाद्य तस्याः ॥ ६३ ॥

जानुद्वन्द्वं मनसिजपरब्रह्मभण्डारसारं
निक्षेप्तुं तत्प्रियसख! समुद्गायते मङ्गलाङ्ग्याः ।
जङ्घाकाण्डावपि च तदुपासङ्गयुग्मानुपूर्वी-
भङ्गीभङ्गप्रणयननिसर्गोष्मलौ पक्ष्मळाक्ष्याः ॥ ६४ ॥

प्रत्यग्रोद्यित्वरकिसलयान्तःसमानप्रदिम्नो-
रिन्धे तस्याश्चरणतलयोः कोऽपि कान्तिप्रपञ्चः ।
यत्र न्यस्तो निपुणमधिकारोऽयमित्येव बुद्ध्या
लाक्षारागः सपदि दिनदीपायते मेदुरोऽपि ॥ ६५ ॥

यौ मे नम्रे शिरसि शतशः शेखरत्वं श्रयेते
संसृज्येते रहसि च सरूपेण बिम्बाधरेण ।
खिद्येते (तौ) पदकिसलयौ कोमलावद्य तस्या
नूनं भूयो रणरणिकया सञ्चरिष्णोः समन्तात् ।। ६६ ।।

राकातारापरिवृढसुधासिन्धुगर्भावगाह-
प्रोन्मृष्टोष्मायितशिशिरभानुप्रभादर्शनीये ।
यस्मिन् मग्ना कमलनयना कान्तिपूरे सुदूरं
धत्ते सोऽयं न परमधुना वृद्धिमद्याबलायाः ।। ६७ ।।

इत्याख्यातैः प्रियसख ! यथारूपमङ्कैर्ब्रुवाणै-
र्विश्लेषार्तिं मम सहचरीं तां सखीनां समाजे ।
ज्ञात्वा वाचामवसरमभीप्सन् मुहूर्तं सहेथा
न स्याद् द्वारः खलु चलधियामातुराणां सदैव ।। ६८ ।।

कोऽयत्प्रेमप्रणयगहनस्तादृशो रागभूमा
क्वासौ स्वापे बत झटिति विध्वस्तदाक्षिण्यरागः ।
तस्याकाण्डे विरह इति चित्रीयमाणा स्थिता वा
द्रष्टव्या सा तव समरुजां तत्र मध्ये सखीनाम् ।। ६९ ।।

कल्पेनोपर्युपरि चटुसोपानमार्गेण दूरा-
देनं मन्दं जनमवशमारोप्य रागातिभूमिम् ।
पश्चात्तस्मिन् खल ! ननु कृतं नाम युक्तं त्वयेदं
छद्माकस्मादिति मयि मृषा वञ्चनाशङ्किनी वा ।। ७० ।।

बाणान् मालागुणनिगळितान् केशगर्भे निधध्वं
खण्डं खण्डं धनुरपि सुखेनात्तपुष्पायुधस्य ।
पांसून्क्षेपैः श्लथयत तथा शिञ्जिनीं चापि सख्यो !
भो वाताशाः ! पिबत मदनं प्राणमात्रावशेषम् ॥ ७१ ॥

कण्ठे बद्ध्वा व्यथयत कुहूकण्ठमुत्कण्ठयन्तं
ज्योत्स्नारन्ध्राणि च जतुरसैः शीतभानोः पि(द?ध)ध्वम् ।
संरुन्ध्वाग्रे सुरभिलतिकानां स्मितं मोहहेतुं
कामोन्मादादिति निजसखीर्व्याहरन्ती स्थिता वा ॥ ७२ ॥

ज्योत्स्नाकाण्डानिह मणिगवाक्षान्तरेणोपयातान्
निष्पीड्यादःस्रुतनवसुधास्यन्दसारेण गात्रम् ।
गाढातप्तं स्नपयत मुहुः सर्वतो बालिका ! मे
तापोद्रेकादिति सहचरीर्वा सखेदं वदन्ती ॥ ७३ ॥

~~वाञ्छादूत्या सविधमुपनीतं निसृष्टार्थया मां~~
चित्ते कृत्वा पिहितनयना मा समाबद्धमौना ।
नीवीस्रंसैः पुलकनिकरैर्भ्रूविभङ्गैरथोष्ठ-
स्पन्दैः स्वेदैरपि च कथयन्ती नु चेतःप्रवृत्तिम् ॥ ७४ ॥

आळीशीतोपचरणबलतो बालिका सा कथञ्चित्
कञ्चित्कालं कुसुमशयने तत्र निद्रायते वा ।
स्वप्ने दृष्टं जनमिममनालक्ष्य पश्चाद् विबोधे
पूर्वस्मादप्यधिकमवशा हन्त ! तापं गता वा ॥ ७५ ॥

हे शीतांशो ! सुरवर ! सखे ! रोहिणीभाग्यराशे !
याचे यत्किञ्चन विरहिणी बालिकाहं भवन्तम् ।
साचिव्योत्थां मदनहतकस्योष्णतां निर्विकल्पं
हित्वा दूरं शिशिरय तनुं मे सुधापूरवर्षैः ॥ ७६ ॥

किं चन्द्रेण त्रिदशपरिपीतात्मसारेण न स्याद्
गोशीर्षाद्रेस्तटभुवि वसन् दक्षिणो गन्धवाहः ।
लभ्येतारादिह यदि भवेदेव सन्तापशान्ति-
र्दैवादेवं त्वदभिगमनं किं नु सा प्रार्थयन्ती ॥ ७७ ॥

सम्भाव्यानामिति विरहखेदे बहूनां दशानां
मध्ये तस्याः समयमुचितं संश्रितः स्वप्रवृत्तेः ।
कुर्वन् सर्वव्ययमपि सखे ! शीतलिम्नो विभूतेः
संवीज्यैनां परिमृदु तदा साधु निर्वापयेथाः ॥ ७८ ॥

अच्छादच्छैः कलशजमुनेर्नित्यसान्निध्ययोगा-
च्छीताच्छीतैरपि तटरुहां चन्दनानोकहानाम् ।
छायाश्लेषान्मलयजरसाम्भःकणैः सान्द्रपातैः
संसिच्यैनां मुहुरपि च संवीज्य संजीवयेथाः ॥ ७९ ॥

इत्थं देवप्रवर ! भवतः साधु शीतोपचारै-
र्दूरे कृत्वा विरहदवथुं किञ्चिदाश्वस्य बाला ।
यावद् दृष्टिं निभृतमभितो विक्षिपत्यश्रुमग्नां
तावत् त्वं च प्रकटय निजं रूपमस्यै मनोज्ञम् ॥ ८० ॥

पश्यन्तीनां सपदि मुदितं त्वां पुरस्तात् सखीना-
माश्चर्यातिस्फुटनयननिर्वान्तशोभासुधाभिः ।
सान्द्रादिग्धे कुतुकभयमन्दाक्षहर्षाद्भुतानां
(पूर्वाद्रिं?) सा वपुषि भवतः प्रापयिष्यत्यपाङ्गम् ॥ ८१ ॥

ब्रूयाश्चैवं कमलनयनां तां शुभे! ते कमित्रा
संदिष्टं मां मलयमरुतं विद्धि जैवातृकेन ।
आस्ते सोऽयं कनककटके साम्प्रतं शैलराजे
हन्तैकाकी हृदि निहितया तु त्वया सद्वितीयः ॥ ८२ ॥

वाणीमेवं त्वयि वदति पर्जन्यसिक्तेव धात्री
सा सौहित्यं परमुपगता शीतबाष्पप्ररोहा ।
सत्कृत्यारादथ समुपवेश्यादितः प्रक्ष्यति त्वां
मद्वृत्तान्तं तदनु सकलं वक्ष्यसि त्वं च तस्यै ॥ ८३ ॥

कल्यः कल्याणिनि! तव पतिस्त्वत्कुचोत्सङ्गशायी
सुप्तः केनाप्ययमपहृतः खेचरेणातिगूढम् ।
नीतः शैलं कनककटकं तत्र तद्वाक्यबद्धो
मां सन्दिश्य त्वरितगमनं प्राहिणोत् त्वत्सकाशम् ॥ ८४ ॥

निर्धूयाधिं निशमय सुखं भामिनि! त्वं मुखान्न-
स्तत्सन्देशानलमलममुष्मिन् जने शङ्कितेन ।
जानीया मां वरतनु! जगत्प्राणमेतं समस्तं
जन्तुव्रातं फलमनभिलष्यैव संचेष्टयन्तम् ॥ ८५ ॥

आचिख्यासोः किमपि भवतीं पाटवप्रश्नपूर्वं
कान्ते! चेतो मम बत निजं क्लैब्यमालम्बतेऽद्य।
किञ्चायाते विभवति गुरौ विप्रयोगे स्खलन्ती
वाणी नैकं पदमपि बहिः कष्टमाविष्करोति॥ ८६॥

त्वय्येतेषां हतविधिवसन्ताङ्गजानां विरोधः
कीदृक् स्यादित्यनिशमभिवृद्धस्य चिन्ताम्बुराशेः।
वीचिव्रातैस्तृणवदभितः क्षिप्यमाणा ममैता
वाणीराकर्णय कृशतनो! जर्जरा निष्पतन्तीः॥ ८७॥

यस्ते वक्षोरुहशिखरिणौ केशघोरान्धकारं
स्फायच्छ्रोणीरथमवनतं नाभिरन्ध्रं च कान्ते!।
संश्रित्य प्रागभवमसमेषोरभीस्त्वद्वियोगे
सोऽहं तेन प्रलघु बहुधा बाणलक्षीक्रियेऽद्य॥ ८८॥

संचिन्वानः प्रतितरुलतं पुष्पजातं समन्ता-
च्चूतोद्भ्रान्तैः प्रगुणितपिकव्रातकण्ठो मरन्दैः।
ऊष्मोद्गारी मदनसहकृत्वा वसन्तोऽपि काले
मां प्रत्यस्यां विपदि नितरां वैरमाविष्करोति॥ ८९॥

अस्तं गत्वा जलधिकुहराद् बाडवार्चींषि हृत्वा
किं वा वर्षत्ययमुडुपतिर्मामकेष्वङ्गकेषु।
किं वा शम्भोर्निटिलनयनाच्चोरयित्वोर्ध्वरश्मीन्
कोटीरान्तर्निभृतवमतिर्विक्षिपत्युग्रतापान्॥ ९०॥

तुल्यं सूर्यो हुतभुगहमप्यक्षिधुर्या नियुक्ता
रुद्रेणौष्ण्यं प्रथितमनयोरेव मे वैपरीत्यम् ।
स्पर्धाबन्धादिति बलवदूष्मायते नूनमिन्दु-
र्दुर्मर्षा हि च्युतिरिह गुणस्यैकधुर्ये जनानाम् ॥ ९१ ॥

यत्कण्ठोत्था विदधति गिरो विश्वसाम्राज्यलक्ष्मी-
पात्रं चेताजनुषमनुकालं क्वचिन्न स्खलन्त्यः ।
तेषां शृण्वन्ननु गिरमरण्यप्रियाणां द्विजानां
हा हा घोरं मुहुरपि कुहूनादमृच्छामि मूर्च्छाम् ॥ ९२ ॥

श्लिष्टा कण्ठावधि वरिवृधत्पुष्पलावण्यलक्ष्मी-
सम्पन्नाभिस्तरळमृदुशाखाञ्चलाभिर्लताभिः ।
शाखावन्तः किसलयपुटैरात्तरागाः प्रिये ! नौ
प्रेमप्रौढेः किमपि बत ! लीलायितं स्मारयन्ति ॥ ९३ ॥

त्वत्केशभ्रूवदनकुचनाभीनितम्बैर्जितानां
शैवालोर्मीसरसिरुहचक्रभ्रमीसैकतानाम् ।
याः पद्मिन्यः खलु शरणदास्ताः प्रिये ! साम्प्रतं मां
पश्यन्त्यस्ते सहचरमिहैकाकिनं किं सहेरन् ॥ ९४ ॥

वाराम्भोधेः शिशि(रितत)रोपत्यकं निर्झराणां
शाखिव्रातैः पिहितशिखरं सर्वतः पर्णलाग्रैः ।
सम्प्रत्येनं शिखरिणमपि प्रेयसि ! त्वद्वियोगे
मन्ये शून्यं बत हुतवहेनावृतं वा समन्तात् ॥ ९५ ॥

वल्लीस्तन्वीस्तनुलतिकया दृग्विलासेन भृङ्गान्
वक्त्रेणाम्भोरुहमपि कुचाभ्यां प्रिये! कोकयुग्मम् ।
श्रोण्या धन्ये! पुळिनमपि ते वञ्चितः संश्रयेऽहं
भ्रान्त्या तत्तत्सदृशमभिलाषं मृषा लब्धुकामः ॥ ९६ ॥

या दुष्प्रापा स्वयमथ समायाति चेदेकदा त्वां
संदर्श्याराद् द्रुतमपरिपूर्णेच्छमेवाच्छिनत्ति ।
तां नो निद्रां प्रतिशुवमहं श्रद्दधे सङ्गमे ते
नन्वर्धाप्तेः परमिह वरं वाञ्छितस्यानवाप्तिः ॥ ९७ ॥

यच्चित्रे ते सुदति! पुनरालोकनं तापशान्त्यै
तन्मे बाले! भृशमपरथा वर्धयत्येव तापम् ।
भोगस्योपर्युपरि परिवृद्धिर्यदि प्रीतये स्या-
देषा चित्रे कथमिव घटेतानुकल्पे मनोज्ञे ॥ ९८ ॥

कन्दर्पाग्नौ स्फुटति दयिते! मर्मरे मानसे मे
सङ्कल्पो नौ कथमिव पटुर्योजने तत्र जातः ।
किं वालापैरिह विघटयन् नौ विधिः कर्तुमीष्टे
किं नो भूयः प्रतिविधिषु चान्येषु तत्रोपरोधम् ॥ ९९ ॥

शून्याटव्यां चिरमिह वियोगव्यथायां भ्रमन्तं
दिङ्मोहो मां हरति मदनोन्मादनामापथेन ।
भ्रान्त्या दूरं मुहुरत इतो निःसहत्वेन नूनं
सा लज्जापि क्वचिदपि परित्यज्य मामद्य याता ॥ १०० ॥

पुष्पाण्यन्वक् पवनविधुतान्यायता भृङ्गपङ्क्ती-
झँकुर्वाणा झटिति पुरतो वीक्ष्य मां प्रत्यनङ्गः ।
धावत्यास्फालितधनुरमर्षीति सम्भाव्य भीत्या
नामग्राहं तव सुबहु विक्रुश्य दूरं पलाये ॥ १०१ ॥

वीक्ष्याभ्याशे सपदि तरुणं कोकिलं चूतवल्ल्याः
सोत्कम्पाया नवकिसलयं चारु चुम्बन्तमेकम् ।
आः पापापत्रप ! मम पुरो मा कृथाः कामचारं
मत्कान्तायामिति बहु समुद्घुष्य धावामि वेगात् ॥

संवीक्ष्याकालिकमचिररोचिःसमाश्लिष्टमभ्रे
योगं यादृच्छिकमुपगतं चेन्दुना वारिवाहम् ।
रे रे पापामर! किमिति मां वञ्चयित्वा प्रियां मे
मुष्णासि त्वं विसृज विसृजेति भ्रमादुल्लपामि ॥ १०३ ॥

अस्तं याते कमितरि रवावूढरागा हुताशं
भासो यान्तीः सपदि परितो वीक्षमाणो दिनान्ते ।
प्रेम्णः प्रौढिं मयि तव परं साहसिक्यं च जानन्
मुग्धे! पापं किमपि परिशङ्क्याशु मूर्च्छां व्रजामि ॥ १०४

अस्मिन् कृच्छ्रे मधुसहचरस्यैष सर्वाभिसारो
भावी कीदृक् त्वयि मनसिजस्येति चिन्ताभितापात् ।
मूर्च्छालं मां पतितमनुकम्पाभरेणातिशीतै-
रास्राम्भोभिर्नवरमटवीदेवता जीवयन्ति ॥ १०५ ॥

पश्चायातान् मदनविशिखानात्मघाताय मत्वा
प्राणा मे तान् बहिरिव निरोद्धुं स्थिताः कण्ठदेशे ।
स्वं पश्चत्वं प्रति न परितोषं गताः पश्चभावं
मन्ये चाशु प्रणयिनि! ममाप्यत्र कर्तुं यतन्ते ॥१०६॥

अव्यापन्नां सपदि दयितां लप्स्यसे मास्तु शङ्का
मद्वाक्यस्थः किमपि भविता श्रेयसे ते वियोगः ।
देवस्येत्थं प्रणयवचसा गाढमम्प्रत्ययोऽहं
जीवाम्येव प्रबलमपि निर्धूय कामोपरोधम् ॥ १०७ ॥

चन्द्रश्चन्द्रो मधुरपि मधुर्मन्मथो मन्मथोऽसौ
मय्यापन्ने विभवितुमहं चाहमेवास्म्यधीरः ।
किंचाकिञ्चित्करभुजबलानादधानाधुनैता-
नाशा गुर्वी बलवदनिशं पाति मां प्राणनाथे! ॥ १०८ ॥

तत् त्वं चाकस्मिकमशनिपातं वियोगाख्यमेतं
चेतःप्रोन्माथिनमपि सहेथाः क्षणं मीलिताक्षी ।
संयोगाख्याप्यनुपदममुष्यापतेदम्बुवृष्टि-
स्तापोच्छित्त्यै पटुरिह विधेर्नैकरूपा हि सृष्टिः ॥१०९॥

माने मानं शतगुणमथो ते प्रसादे प्रसादं
दुःखे दुःखं बत विदधतस्तूर्णमाळीजनस्य ।
जानाम्येवापदि हृदयशल्यापनोदेऽपटुत्वं
रक्षात्मानं कृतिनि! बलवत्त्वमेवात्मनात्र ॥ ११० ॥

यावद् गन्तुं निलयमनुजानाति देवो मुदा मा-
मेकाहे वा किमुत गणरात्रे गते नास्मि जाने।
तावद् गच्छाम्यलघुजघने! सन्निधिं ते नयेन्मां
मन्ये व्योम्ना झटिति स पुरेवानुकम्पापयोधिः॥ १११॥

प्रेम्णः पारं परमधिवसन्ती सदा चक्रवाकी
नैकां न द्वे न च कतिपयाः किन्तु रात्रीः समस्ताः।
कन्दर्पोड्डामरमिथुनसम्भोगलीलानुकूला
धैर्यालम्बा गमयति विना वल्लभाश्लेषसौख्यम्॥ ११२॥

लङ्काद्वीपे दशवदनतो बिभ्यती घोररूपा-
दुग्रम्पश्यैर्निशिचरगणैस्तर्ज्यमानापि सीता।
घोरं दुःखं निपुणमतिचक्राम सा धैर्यमेकं
संश्रित्योच्चैरिति वरगुणे! ते ननु ज्ञातमेव॥ ११३॥

आत्मागारे वसतिरभितः प्रेमवत्यो वयस्या
वैरी भस्म त्रिपुरजयिनो नेत्रकुण्डे त्वनङ्गः।
सोढव्यं वा मृदुलकुसुमान्यायुधं तस्य यस्या
ही ही तस्यास्तव विधुरता चेत् किमत्रालपामि॥ ११४॥

यत्नेनारो(चि? पि)तमतिचिरेणोपदेशे पटु(त्वं?स्त्वं)
बाले! नित्यं पुर इव मुदा नर्तयेथा मयूरम्।
काले काले मृदुकलपदश्चापि गाथा नवीना
मुग्धामध्यापय शुकवधूं मञ्जुलालापरम्याम्॥ १:५॥

प्रत्यग्रारोपणशिथिलमूलां घनावालपूरं
वर्षंवर्षं प्रतिदिनमपो मल्लिकां तर्पयेथाः।
चेतो दत्तं प्रथमकुसुमाभ्युद्गमे चूतयूनो
नो विस्मर्तुं विभवगुरुमर्हासि कामोत्सवं वा ॥ ११६ ॥

एवंप्रायेष्वनवधिषु कृत्येषु धामन्मनास्ते
चेतो लक्ष्यं कथमिव सदा लक्षयेत् पुष्पबाणः ।
लक्षीकुर्यादथ यदि पतन्त्वत्र बाणाः कथं वा
लोलाल्लोले मधुभरगुरूण्यार्तवान्यस्य वेगात्(?) ॥११७॥

सम्प्रत्येनं विधिविरचितं विप्रलम्भं च पीठं
पूर्वस्मादप्युपरितनमारोढुमुत्प्लुत्य वेगात् ।
स्थाने प्रेम्णः प्रणयिनि! विजानीहि मा दुर्विकल्पै-
रात्मानं त्वं बत बत मुधा खेदयाल्पैरहोभिः॥ ११८॥

भद्रे! भूयः शृणु मदनचैत्रेन्दवो ये वियोगे
सम्प्रत्याविष्कृतभुजबला वैरितामेव यान्ति ।
तानेवामून् कतिपयदिनैरूष्मविश्लेषसौम्यान्
द्रक्ष्यस्यग्रे विरहविरतौ त्वन्नियोगप्रतीक्षान्॥ ११९ ॥

श्रावं श्रावं मृदु पिकवधूकूजितं पुष्पवाट्यां
वीक्षं वीक्षं जलविहगलीलायितान्यम्बुजिन्याम्।
पायं पायं मधु शशिकरोल्लासि हर्म्योत्तमाङ्गे
घस्रानग्रे नवनवसुखं भोक्ष्यसे मत्सहाया। १२० ॥

वाक्यं प्रत्यायकमपि वदाम्येकदा रूढमाना
हित्वा शय्यां ननु चिरमवागेव वातायनस्था ।
त्यक्त्वा राहुः शशिनमयमत्त्याननेन्दुं तवेति
क्रोशत्युच्चैर्मयि किल भिया श्लिष्टवत्याशु मां त्वम् ॥ १२१

गाढाश्लिष्टं व्रततिभिरनेकाभिरालक्ष्य चूतं
नन्दत्युच्चैर्मयि परमलं रम्य इत्येव बुद्ध्या ।
सत्यं भाव्यं सुभगतरुणैरेवमेवेत्यकस्मा-
दुक्त्वा सेर्ष्यं ननु कटुतरैरक्षिणोर्मां कटाक्षैः ॥ १२२ ॥

स्नानार्द्राया विपुलजघनासक्तसूक्ष्माम्बराया-
श्चेटीनां यो निवसनमुपाहर्तुमासीद्विलम्बः ।
लीलायां मे दृशि किल समारोप्य तत्रापराधं
त्वं जातेर्ष्या तदपि न गृहीत्वैव सोत्कम्पमस्थाः ॥ १२३ ॥

प्रक्रीडन्ती सह परिजनैर्वीक्ष्य वापीजले स्वां
चिल्लीरेखां तरळकुटिलामूर्मिमालासु दीर्घाम् ।
भीता भ्रान्त्या किल भुजग इत्यात्तकम्पाधिरूढा
वक्षस्तूर्णं मम दृढमबध्ना गळान्ते भुजाभ्याम् ॥ १२४ ॥

नन्वायान्त्यां कमलवनतो वल्लभायां निजायां
गोपायन्तं सपदि कलहंसीं परां पक्षपाल्या ।
हंसं दृष्ट्वाप्यहमकृषि नो तत्र गर्हामकार्षं
चान्तः श्लाघामिति करसरोजेन ही मामताैत्सीः ॥ १२५ ॥

बद्धो रोषान्नवकुसुमदाम्ना त्वया ताड्यमानो
नाळैः पाद्मैरपतमहमारोप्य यावद्विमूर्च्छाम् ।
खिन्ना तावत् त्वमपि किल तत्सत्यमित्येव बुद्ध्वा
नन्वाश्लि(क्षे?ष्यो) लघु हिमजलेनाभिषिच्यावशं माम ॥

विश्लेषस्य प्रथमसमये ते निपीयाननेन्दुं
तावत्सौधाङ्कणमुपगतं चन्द्रमन्यं पिपासुम् ।
विज्ञातुं तन्मधुरि(माभि? वि)भेदं चिरादुत्सुकं मां
मा मा दैवं नवममृतमुच्छोषयेति न्यरौत्सीः ॥ १२७ ॥

इत्याख्यातैः स्मृतिपथगतैः पूर्ववृत्तैर्मदीयाः
श्रद्धत्स्वैताः शशिमुखि ! गिरो मां च जानीहि कल्यम् ।
एवं चास्तं व्रजति विरहातङ्कजीमूतकाले
स्वैरक्रीडां भजतु कलहंसी धृतिर्मानसे ते ॥ १२८ ॥

एतैरुद्यत्प्रणयमसृणैर्गाढबन्धाप्रकम्पैः
प्रौढच्छायैरिति मम गिरां गुम्फसोपानमार्गैः ।
तन्वीमारोपय सुदृशमानन्दसौधाग्रभूमिं
खिन्नां देवप्रवर ! करुणां प्रग्रहीकृत्य गाढाम् ॥ १२९ ॥

आनन्दोत्थानथ कबळयन् शीतळानश्रुबिन्दून्
मन्दस्मित्या सुरभिलतनुः स्मेरपद्माननायाः ।
तामापृच्छ्य त्वमपि विचर स्वेच्छया देवलोकान्
भूयश्चामुं जनमनुगृहाणात्मसौभाग्यलक्ष्म्या ॥ १३० ॥

(उत्तरभागः समाप्तः ॥)